B.A. Sanskrit
Year – I
Semester – I
Paper - III

# शब्दधातुरूपपरिचयः प्रथमादर्शश्च
# Sabda,Dhatu Rupaparicaya & Prathamadarsa

## Centre for Distance and Online Education


श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संसकृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# शब्दधातुरूपपरिचयः

# प्रथमादर्शः

## पाठ्यपरिचयः

संस्कतसाहित्यं प्रति सामान्यप्रवेशाय तत्र च विषयावबोधनाय यथा व्याकरणशास्त्रस्य आवश्यकता वर्तते। तथैव अस्मिन् निर्दिष्टे पत्रे छात्राणां व्याकरणज्ञानसहितं कथा छलेन तेषां संस्कृतभाषाशुध्यर्थं कश्चन प्रयाशः विहितः वर्तते। आदौ तावत् अजन्त- हलन्त-सर्वनामशब्दादीनां धातूनाञ्च परिचयप्रदानेन छात्राणां वाक्यरचनायाः सामर्थं सम्भवति इति मत्वा प्रथमखण्डद्वये शब्दरूपाणां धातूरूपाणाञ्च विवरणं वर्तते। तदनु प्रथमादर्शस्य आदितः षड्विंशत्पाठपर्न्तं विदितीनां कथावस्तूनाम् उपस्थापनपूर्वकं छात्राणाम् अभिरुचिसम्पादनाय व्याकरणशास्त्रगतनियमानां विचारः प्रदीयते। येन छात्राणां प्रारम्भिकस्तरे व्याकरणशास्त्रप्रारम्भिकज्ञानं सम्भवति।

**प्रथमः खण्डः – अजन्त- हलन्त-सर्वनामशब्दाः ।**

अस्मिन् खण्डे अजन्तशब्दरूपाणं रूपाणि, हलन्तशब्दरूपाणां रूपाणि, सर्वनामशब्दरूपाणां रूपाणि त्रिषु लिङ्गेषु निरूपितानि सन्ति। यस्याध्ययनेन छात्राणां कृते संस्कृतशब्दरूपाणाम्, वचनानाम्, विभक्तीनां च ज्ञानं जायते।

**द्वितीयः खण्डः – दशगणादपि एकस्य धातोः लट्-लङ्-लृट्-लोट्-विधिलिङ्ग रूपाणि।**

अस्मिन् खण्डे निर्दिष्टलकारेषु तत्र तत्र गणेषु विद्यमानां धातूनां रूपाणि प्रदत्तानि सन्ति। यस्याध्ययनेन छात्राणां कृते धातुरूपाणाम्, वचनानाम्, पुरुषादीनाञ्च ज्ञानं जायते।

**तृतीयः खण्डः – प्रथमादर्शे आदितः द्वादशपाठाः।**

अस्मिन् खण्डे संस्कृतं पठितुं प्रविष्टानां नूतनानां छात्राणां भाषा प्रवेशाय उपयुक्तोऽयं ग्रन्थः- संस्कृतप्रथमादर्श इति। अस्मिन् ग्रन्थे गद्यपद्यद्वारा संस्कृतभाषाम् अवगन्तुं कश्चन सरलः पन्थाः अनुसृतो वर्तते। अस्य पठनेन संस्कृतभाषायां छात्राणां सरलेनोपायेन प्रवेशो भविष्यति।

**चतुर्थः खण्डः – प्रथमादर्शे द्वादशतः चतुर्विंशतिपर्यन्ताः पाठाः।**

अस्मिन् खण्डे संस्कृतं पठितुं प्रविष्टानां नूतनानां छात्राणां भाषा प्रवेशाय उपयुक्तोऽयं ग्रन्थः- संस्कृतप्रथमादर्श इति। अस्मिन् ग्रन्थे गद्यपद्यद्वारा प्रथमादर्शे विद्यमानानां द्वादशतः चतुर्विंशतिपाठं यावत्विद्यमानानां कथानां ज्ञानं भवति तत्रत्य वर्णितानां मूल्यानां विषये ज्ञानं च भविष्यति। एवं संस्कृतभाषाम् अवगन्तुं कश्चन सरलः पन्थाः अनुसृतो वर्तते। अस्य पठनेन संस्कृतभाषायां छात्राणां सरलेनोपायेन प्रवेशो भविष्यति।

**पञ्चमः खण्डः – प्रथमादर्शे पञ्चविंशतितः षड्विंशत्पर्यन्ताः पाठाः।**

अस्मिन् खण्डे संस्कृतं पठितुं प्रविष्टानां नूतनानां छात्राणां भाषा प्रवेशाय उपयुक्तोऽयं ग्रन्थः- संस्कृतप्रथमादर्श इति। अस्मिन् ग्रन्थे गद्यपद्यद्वारा प्रथमादर्शे विद्यमानानां पञ्चविंशतितः षड्विंशत्पाठं यावत्विद्यमानानां कथानां ज्ञानं भवति तत्रत्य वर्णितानां मूल्यानां विषये ज्ञानं च भविष्यति। एवं संस्कृतभाषाम् अवगन्तुं कश्चन सरलः पन्थाः अनुसृतो वर्तते। अस्य पठनेन संस्कृतभाषायां छात्राणां सरलेनोपायेन प्रवेशो भविष्यति।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| प्रथमः | अजन्तशब्दाः | 8-16 |
| | हलन्तशब्दाः | 16-19 |
| | सर्वनामशब्दाः | 19-31 |
| द्वितीयः | दशगणादपि एकस्य धातोः लट्-लङ्-लृट्-लोट्-विधिलिङ्ग् रूपाणि | 32-47 |
| तृतीयः | प्रथमादर्शे आदितः द्वादशपाठाः | 48-74 |
| चतुर्थः | प्रथमादर्शे द्वादशतः चतुर्विंशतिपर्यन्ताः पाठाः | 75-101 |
| पञ्चमः | प्रथमादर्शे पञ्चविंशतितः षड्विंशत्पर्यन्ताः पाठाः | 102-133 |

# खण्डः - १

# अजन्त-हलन्त-सर्वनामशब्दाः

## पाठसंरचना

- प्रस्तावना
- उद्देशयम्
- अजन्त-हलन्त-सर्वनामशब्दाः
- बोधप्रश्नाः
- शब्दावली
- अभ्यासप्रश्नाः
- सन्दर्भग्रन्थाः
- सहायकग्रन्थाः

**प्रस्तावना-**

पदानां समूहो वाक्यम्। तत्र पदं नाम सुबन्तं तिङन्तं च इति **सुप्तिङन्तं पदम्** इति पाणिनिसूत्रनिर्देशात्। अनेन सूत्रेण सुबन्तां तिङ्न्तानाञ्च पदसंज्ञा विधीयते तत्र येषाम् अन्ते सुप् प्रत्ययाः

भवन्ति ते सुबन्ताः कथ्यन्ते तथा च येषाम् अन्ते तिङ्- प्रत्ययाः भवन्ति ते तिङन्ताः कथ्यन्ते। तत्र सुप्-प्रत्ययविधानार्थं स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाङ्ङ्योस्सुप् इति सूत्रं वर्तते एवं तिङ्- प्रत्ययविधानार्थं तिप्तस्झिसिप्थस्थमिब्वस्मस् तातांझथासाथांध्वमिड्वहिमहिङ् इति सूत्रद्वयं वर्तते। अस्मिन् खण्डे सुबन्तेषु  अजन्त-हलन्त-सर्वनामशब्दभागः वर्तते।

**उद्देश्यम्-**

**अस्यपाठस्याध्ययनेन**

- अजन्तशब्दानां ज्ञानं भविष्यति।
- हलन्तशब्दरूपाणां ज्ञानं भविष्यति।
- सर्वनामशब्दरूपाणां ज्ञानं भविष्यति।
- विभक्तेः ज्ञानं भविष्यति।

सुप्-प्रत्ययः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सु | औ | जस् |
| द्वितीया | अम् | औट् | शस् |
| तृतीया | टा | भ्याम् | भिस |
| चतर्थी | ङे | भ्याम् | भ्यस् |
| पंचमी | ङसि | भ्याम् | भ्यस् |
| षष्ठी | ङस् | ओस् | आम् |
| सप्तमी | ङि | ओस् | सुप् |

# अजन्तशब्दाः

## अकारान्तः पुंल्लिङ्गः रामशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |

| | | | |
|---|---|---|---|
| चतर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पंचमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधन | हे राम! | हे रामौ! | हे रामाः! |

एवं देव-कृष्ण-मुकुंदादयोऽकारांताः पुँल्लिंगाः ।

## इकारान्तः पुंल्लिङ्गः हरिशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पंचमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधन | हे हरे! | हे हरी! | हे हरयः! |

एवं भूपति-रवि-यति-अतिसखीत्यादयः इकारांताः पुंल्लिङ्गाः शब्दाः।

## उकारान्तः पुंल्लिङ्गः भानुशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भानुः | भानू | भानवः |
| द्वितीया | भानुम् | भानू | भानून् |
| तृतीया | भानुना | भानुभ्याम् | भानुभिः |
| चतर्थी | भानवे | भानुभ्याम् | भानुभ्यः |
| पंचमी | भानोः | भानुभ्याम् | भानुभ्यः |
| षष्ठी | भानोः | भान्वोः | भानूनाम् |
| सप्तमी | भानौ | भान्वोः | भानुषु |
| सम्बोधन | हे भानो! | हे भानू! | हे भानवः! |

एवं शंभु-विष्णु- सूनु इत्यादयः उकारान्ताः शब्दाः।

## ऋकारान्तः पुंल्लिङ्गः पितृशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितृन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |

| | | | |
|---|---|---|---|
| चतर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पंचमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितृणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधन | हे पितः! | हे पितरौ! | हे पितरः! |

एवं भ्रातृ-नेतृ-नप्तृ-शास्तृ इत्यादय ऋकारान्ताः।

## आकारान्तः स्त्रीलिङ्गः रमाशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पंचमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमायाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधन | हे रमा! | हे रमे! | हे रमाः! |

एवं गंगा-लज्जा-विद्यादयः आबन्ताः।

## इकारान्तः स्त्रीलिङ्गः रुचिशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रुचिः | रुची | रुचयः |
| द्वितीया | रुचुम् | रुची | रुचीः |
| तृतीया | रुच्या | रुचिभ्याम् | रुचिभिः |
| चतर्थी | रुचये | रुचिभ्याम् | रुचिभ्यः |
| पंचमी | रुचेः | रुचिभ्याम् | रुचिभ्यः |
| षष्ठी | रुचेः | रुचयोः | रुचीनाम् |
| सप्तमी | रुच्याम् | रुचयोः | रुचिषु |
| सम्बोधन | हे रुचे! | हे रुची! | हे रुचयः! |

एवं स्तुति-मति-बुध्दि इत्यादयः इकारान्ताः।

## ईकारान्तः स्त्रीलिङ्गः नदीशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |

| | | | |
|---|---|---|---|
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्याम् | नदीभिः |
| चतर्थी | नद्यै | नदीभ्याम् | नदीभ्यः |
| पंचमी | नद्याः | नदीभ्याम् | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| सम्बोधन | हे नदि! | हे नद्यौ! | हे नद्यः! |

एवं पृथ्वी-कुमारी गौर्यादयः। लक्ष्मी-अवी-स्तरी तन्त्री इत्येषां तु प्रथमैकवचनं लक्ष्मीः, अवीः, स्तरीः, तन्त्रीः इति विसर्गान्तम् । शेषं सर्वनदीशब्दवत् ज्ञेयम्।

## उकारान्तः स्त्रीलिङ्गः धेनुशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| द्वितीया | धेनुम् | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतर्थी | धेन्वै, धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पंचमी | धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी | धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेनौ | धेन्वोः | धेनुषु |

| | | | |
|---|---|---|---|
| सम्बोधन | हे धेनो! | हे धेनू! | हे धेनवः! |

एवं रज्जु-हनु-तनु इत्यादयः उकारान्ताः।

## ऋकारान्तः स्त्रीलिङ्गः मातृशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातारम् | मातरौ | मातृः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पंचमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातृणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| सम्बोधन | हे मातः! | हे मातरौ! | हे मातरः! |

## अकारान्तः नपुंसकल्लिङ्गः जलशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | जलम् | जले | जलानि |

| | | | |
|---|---|---|---|
| द्वितीया | जलम् | जले | जलानि |
| तृतीया | जलेन | जलाभ्याम् | जलैः |
| चतर्थी | जलाय | जलाभ्याम् | जलेभ्यः |
| पंचमी | जलात् | जलाभ्याम् | जलेभ्यः |
| षष्ठी | जलस्य | जलयोः | जलानाम् |
| सप्तमी | जले | जलयोः | जलेषु |
| सम्बोधन | हे जल! | हे जले! | हे जलानि! |

एवं पुस्तक, फल, ज्ञानादयः अकारान्ताः नपुंसकलिङ्गाः।

## इकारान्तः नपुंसकलिङ्गः दधिशब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | दधि | दधिनी | दधीनि |
| द्वितीया | दधि | दधिनी | दधीनि |
| तृतीया | दध्ना | दधिभ्याम् | दधिभिः |
| चतर्थी | दध्ने | दधिभ्याम् | दधिभ्यः |
| पंचमी | दध्नः | दधिभ्याम् | दधिभ्यः |
| षष्ठी | दध्नः | दध्नोः | दधिनाम् |
| सप्तमी | दधिनि | दध्नोः | दधिषु |

| | | | |
|---|---|---|---|
| सम्बोधन | हे दधे! | हे दधिनी! | हे दधीनि! |

एवं अस्थि-सक्थि-अक्षि शब्दाः।

# हलन्तशब्दाः

## नकारान्तः नपुंसकलिङ्गः आत्मन्-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | आत्मा | आत्मानौ | आत्मानः |
| द्वितीया | आत्मानम् | आत्मानौ | आत्मनः |
| तृतीया | आत्मना | आत्मभ्याम् | आत्मभिः |
| चतर्थी | अत्मने | आत्मभ्याम् | आत्मभ्यः |
| पंचमी | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| षष्ठी | आत्मनः | आत्मनोः | आत्मनाम् |
| सप्तमी | आत्मनि | आत्मनोः | आत्मासु |
| सम्बोधन | हे आत्मन्! | हे आत्मानौ! | हे आत्मानः! |

## सकारान्तः नपुंसकलिङ्गः मनस्-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मनः | मनसि | मनांसि |

| | | | |
|---|---|---|---|
| द्वितीया | मनः | मनसि | मनांसि |
| तृतीया | मनसा | मनोभ्याम् | मनोभिः |
| चतर्थी | मनसे | मनोभ्याम् | मनोभ्यः |
| पंचमी | मनसः | मनोभ्याम् | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनसु |
| सम्बोधन | हे आत्मन्! | हे आत्मानौ! | हे आत्मानः! |

एवं पयस्-वयस्-वचस् इत्यादयः नपुंसकाः।

## चकारान्तः नपुंसकस्त्रीलिङ्गः वाच्-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वाक् | वाचौ | वाचः |
| द्वितीया | वाचम् | वोचौ | वाचः |
| तृतीया | वाचा | वाग्भ्याम् | वाग्भिः |
| चतर्थी | वाचे | वाग्भ्याम् | वाग्भ्यः |
| पंचमी | वाचः | वाग्भ्याम् | वाग्भ्यः |
| षष्ठी | वाचः | वाचोः | वाचाम् |
| सप्तमी | वाचि | वाचोः | वाक्षु |
| सम्बोधन | हे वाक्! | हे वाचौ! | हे वाच:! |

एवं शुच्-पयोमुच् इत्यादयः।

## तकारान्तः नपुंसकस्त्रीलिङ्गः सरित्-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सरित् | सरितौ | सरितः |
| द्वितीया | सरितम् | सरितौ | सरितः |
| तृतीया | सरिता | सरिद्भ्याम् | सरिद्भिः |
| चतर्थी | सरिते | सरिद्भ्याम् | सरिद्भ्यः |
| पंचमी | सरितः | सरिद्भ्याम् | सरिद्भ्यः |
| षष्ठी | सरितः | सरितोः | सरिताम् |
| सप्तमी | सरिति | सरितोः | सरित्सु |
| सम्बोधन | हे सरित्! | हे सरितौ! | हे सरितः:! |

## षकारान्तः नपुंसकस्त्रीलिङ्गः प्रावृष्-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | प्रावृट्,प्रावृड् | प्रवृषौ | प्रवृषः |

| | | | |
|---|---|---|---|
| द्वितीया | प्रावृषम् | प्रवृषौ | प्रवृषः |
| तृतीया | प्रावृषा | प्रावृड्भ्याम् | प्रावृड्भिः |
| चतर्थी | प्रावृषे | प्रावृड्भ्याम् | प्रावृड्भ्यः |
| पंचमी | प्रावृषः | प्रावृड्भ्याम् | प्रावृड्भ्यः |
| षष्ठी | प्रावृषः | प्रावृषोः | प्रावृषाम् |
| सप्तमी | प्रावृषि | प्रावृषोः | प्रावृड्क्षु |
| सम्बोधन | हे प्रावृट्! | हे प्रवृषौ! | हे प्रवृषः! |

एवं त्विष्-मुष्-रत्नमुष् इत्यादयः।

## सर्वनामशब्दाः

### अकारान्तः पुंल्लिङ्गः सर्व-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वः | सर्वौ | सर्वाः |
| द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| तृतीया | सर्वेन | सर्वाभ्याम् | सर्वैः |
| चतर्थी | सर्वास्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पंचमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |

| | | | |
|---|---|---|---|
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |
| सम्बोधन | | | |

## आकारान्तः स्त्रीलिङ्गः सर्वा-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वाः |
| द्वितीया | सर्वाम् | सर्वे | सर्वाः |
| तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| चतर्थी | सर्वास्यै | सर्वाभ्याम् | सर्वाभ्यः |
| पंचमी | सर्वस्मात् | सर्वाभ्याम् | सर्वाभ्यः |
| षष्ठी | सर्वस्याः | सर्वयोः | सर्वाषाम् |
| सप्तमी | सर्वस्याम् | सर्वयोः | सर्वासु |
| सम्बोधन | | | |

## अकारान्तः पुंल्लिङ्गः उभ-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमा | | उभौ | |
| द्वितीया | | उभौ | |
| तृतीया | | उभाभ्याम् | |
| चतर्थी | | उभाभ्याम् | |
| पंचमी | | उभाभ्याम् | |
| षष्ठी | | उभयोः | |
| सप्तमी | | उभयोः | |
| सम्बोधन | | | |

## अकारान्तः स्त्रीलिङ्गः उभ-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| प्रथमा | | उभे | |
| द्वितीया | | उभे | |
| तृतीया | | उभाभ्याम् | |
| चतर्थी | | उभाभ्याम् | |

| | | | |
|---|---|---|---|
| पंचमी | | उभाभ्याम् | |
| षष्ठी | | उभयोः | |
| सप्तमी | | उभयोः | |
| सम्बोधन | | | |

## आकारान्तः स्त्रीलिङ्गः द्वितीया-शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | | द्वितीये | द्वितीयाः |
| द्वितीया | | द्वितीये | द्वितीयाः |
| तृतीया | | द्वितीयाभ्याम् | द्वितीयाभिः |
| चतर्थी | | द्वितीयाभ्याम् | द्वितीयाभ्यः |
| पंचमी | | द्वितीयाभ्याम् | द्वितीयाभ्यः |
| षष्ठी | | द्वितीययोः | द्वितीयानाम् |
| सप्तमी | | द्वितीययोः | द्वितीयासु |
| सम्बोधन | | | |

## दकारान्तः त्रिषुलिंङ्गेषु समानरूपः अस्मद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम् | आवाम् | अस्मान् |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतर्थी | मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| पंचमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम | आवयोः | अस्माकम् |
| सप्तमी | मयि | आवयोः | अस्मासु |
| सम्बोधन | | | |

## दकारान्तः त्रिषुलिंङ्गेषु समानरूपः युस्मद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम् | युवाम् | युस्मान् |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |

| | | | |
|---|---|---|---|
| चतर्थी | तुभ्यम् | युवाभ्याम् | युस्मभ्यम् |
| पंचमी | त्वत् | युवाभ्याम् | युस्मत् |
| षष्ठी | तव | युवयोः | युस्माकम् |
| सप्तमी | त्वयि | युवयोः | युस्मासु |
| सम्बोधन | | | |

## दकारान्तः पुंलिङ्गः तद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पंचमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |
| सम्बोधन | | | |

## दकारान्तः स्त्रीलिंङ्गः तद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पंचमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तेषाम् |
| सप्तमी | तस्याम् | तयोः | ताषु |
| सम्बोधन | | | |

## दकारान्तः नपुंसकलिंङ्गः तद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतर्थी | तस्मै | ताभ्याम् | तेभ्यः |

| | | | |
|---|---|---|---|
| पंचमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |
| सम्बोधन | | | |

## दकारान्तः पुंलिंङ्गः यद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतर्थी | यस्मै | याभ्याम् | येभ्यः |
| पंचमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येम् |
| सप्तमी | यस्मिन् | ययोः | येषु |
| सम्बोधन | | | |

## दकारान्तः स्त्रीलिंङ्गः यद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतर्थी | यस्यै | याभ्याम् | याभ्यः |
| पंचमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु |
| सम्बोधन | | | |

## दकारान्तः नपुंसकलिंङ्गः यद्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |
| तृतीया | येन | याभ्याम् | यैः |

| | | | |
|---|---|---|---|
| चतर्थी | यस्मै | याभ्याम् | येभ्यः |
| पंचमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येम् |
| सप्तमी | यस्मिन् | ययोः | येषु |
| सम्बोधन | | | |

## मकारान्तः पुंलिंङ्गः इदम्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम् | इमौ | इमान् |
| तृतीया | अनेन | आभ्याम् | एभिः |
| चतर्थी | अस्मै | आभ्याम् | एभ्यः |
| पंचमी | अस्मात् | याभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |
| सम्बोधन | | | |

## मकारान्तः स्त्रीलिंङ्गः इदम्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम् | इमे | इमाः |
| तृतीया | अनया | आभ्याम् | आभिः |
| चतर्थी | अस्यै | आभ्याम् | आभ्यः |
| पंचमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः | आसु |
| सम्बोधन | | | |

## मकारान्तः नपुंसकलिंङ्गः इदम्- शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम् | इमे | इमानि |
| तृतीया | अनेन | आभ्याम् | एभिः |

| | | | |
|---|---|---|---|
| चतर्थी | अस्मै | आभ्याम् | एभ्यः |
| पंचमी | अस्मात् | याभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः | एषु |
| सम्बोधन | | | |

**शब्दावली-**

शब्दः, पदम्, प्रत्ययः, अजन्तः, अकारान्तः, इकारान्तः, उकारान्तः, ईकारान्तः, ऊकारान्तः, ऋकारान्तः, सर्वनाम, हलन्तः, विभक्तिः, वचनम्, लिङ्गम् इत्यादयाः।

**अभ्यासप्रश्नाः-**

1. अकान्तराम शब्दस्य रूपाणि लिखत्।
2. उकारान्तपुंल्लिभानुशब्दस्य रूपाणि कण्ठस्थं कुरुत।
3. नकारान्तः आत्मन् शब्दस्य रूपाणि लिखत्।
4. षकारान्तः प्रावृष्-शब्दस्य रूपाणि लिखत।
5. मनस् शब्दस्य रूपाणि लिखत।
6. सर्वशब्दस्य रूपाणि लिखत।
7. सर्वाशब्दस्य रूपाणि लिखत।
8. उभशब्दस्य रपाणि लिखत।

**सन्दर्भग्रन्थसूची-**


1. शब्दमञ्जरी- आर. एस. वाद्यार पालकाटु 2014


**सहायकग्रन्थसूची-**


1. रूपचन्द्रिका

# खण्डः – २

# (धातुरूपाणि)

**पाठसंरचना-**

- प्रस्तावना
- उद्देश्यम्
- धातुपाठः
- शब्दावाली
- सारांशः
- सन्दर्भग्रन्थसूची
- सहायकग्रन्थसूची

**१.प्रस्तावना-**

अन्येषां जनानां अर्थबोधाय वयं शब्दानां प्रयोगं कुर्मः। शब्दाश्च द्विविधाः सुबन्तरूपाः तिङन्तरूपाश्च। तिङ्गत्ययास्तावत् धातुभ्यस्समायान्ति, सुप्प्रत्ययास्तावत् प्रातिपदिकेभ्यः। प्रातिपदिकेऽपि धातवः भवन्त्येव। तस्मात् "सर्वं नाम धातुजमाह" इति शिष्टोक्तिः। अस्मिन् पठ्यांशे वयं धातुरूपाणां परिचयः प्राप्यते।

**२.उद्देश्यम्-**

१.धातुरूपाणां ज्ञानम्

२.वाक्यरचनायाः कौशलसंपादनम्

३.नूतनानां शब्दानां ज्ञानम्

४.विभक्तीनां ज्ञानम्

## १.भ्वादिगणः भूधातुः {सत्तार्थकः}

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | भवति | भवतः | भवन्ति |
| म. | भवसि | भवथः | भवथ |
| उ. | भवामि | भवावः | भवामः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अभवत् | अभवताम् | अभवन् |
| म. | अभवः | अभवतम् | अभवत |
| उ. | अभवम् | अभवाव | अभवाम |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | भवतु/भवतात् | भवताम् | भवन्तु |
| म. | भव/भवतात् | भवतम् | भवत |
| उ. | भवानि | भवाव | भवाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | भवेत् | भवेताम् | भवेयुः |
| म. | भवेः | भवेतम् | भवेत |
| उ. | भवेयम् | भवेव | भवेम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | भविष्यति | भविष्यत: | भविष्यन्ति |
| म. | भविष्यसि | भविष्यथः | भविष्यथ |
| उ. | भविष्यामि | भविष्यावः | भविष्यामः |

## २.अदादिगणः अद्धातुः {भक्षणार्थकः}

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | अत्ति | अत्तः | अदन्ति |
| म. | अत्सि | अत्थः | अत्थ |
| उ. | अद्मि | अद्वः | अद्मः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | आदत्/आदद् | आत्ताम् | आदन् |
| म. | आदः | आत्तम् | आत्त |
| उ. | आदम् | आद्व | आद्म |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अत्तु | अत्ताम् | अदन्तु |
| म. | अद्धि | अत्तम् | अत्त |
| उ. | अदानि | अदाव | अदाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | अद्यात् | अद्याताम् | अद्युः |
| म. | अद्याः | अद्यातम् | अद्यात |
| उ. | अद्याम् | अद्याव | अद्याम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | अत्स्यति | अत्स्यतः | अत्स्यन्ति |
| म. | अत्स्यसि | अत्स्यथः | अत्स्यथ |
| उ. | अत्स्यामि | अत्स्यावः | अत्स्यामः |

**३.जुहोत्यादिगण: हुधातुः {दानादानार्थकः}**

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | जुहोति | जुहुतः | जुह्वति |
| म. | जुहोषि | जुहुथः | जुहुथ |
| उ. | जुहोमि | जुहुवः | जुहुमः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अजुहोत् | अजुहुताम् | अजुहवुः |
| म. | अजुहोः | अजुहुतम् | अजुहुत |
| उ. | अजुहवम् | अजुहुव | अजुहुम |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | जुहोतु | जुहुताम् | जुह्वतु |
| म. | जुहुधि | जुहुतम् | जुहुत |
| उ. | जुहवानि | जुहवाव | जुहवाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | जुहुयाद् | जुहुयाताम् | जुहुयुः |
| म. | जुहुयाः | जुहुयातम् | जुहुयात |
| उ. | जुहुयाम् | जुहुयाव | जुहुयाम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | होष्यति | होष्यतः | होष्यन्ति |
| म. | होष्यसि | होष्यथः | होष्यथ |
| उ. | होष्यामि | होष्यावः | होष्यामः |

**४.दिवादिगणः दिव्धातुः**

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | दीव्यति | दीव्यतः | दीव्यन्ति |
| म. | दीव्यसि | दीव्यथः | दीव्यथ |
| उ. | दीव्यामि | दीव्यावः | दीव्यामः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अदीव्यत् | अदीव्यताम् | अदीव्यन् |

| | | | |
|---|---|---|---|
| म. | अदीव्यः | अदीव्यतम् | अदीव्यत |
| उ. | अदीव्यम् | अदीव्याव | अदीव्याम |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | दीव्यतात्,दीव्यतु | दीव्यताम् | दीव्यन्तु |
| म. | दीव्य, दीव्यतात् | दीव्यतम् | दीव्यत |
| उ. | दीव्यानि | दीव्याव | दीव्याम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | दीव्येत्, दीव्येद् | दीव्येताम् | दीव्येयुः |
| म. | दीव्येः | दीव्येतम् | दीव्येत |
| उ. | दीव्येयम् | दीव्येव | दीव्येम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | देविष्यति | देविष्यतः | देविष्यन्ति |
| म. | देविष्यसि | देविष्यथः | देविष्यथ |
| उ. | देविष्यामि | देविष्यावः | देविष्यामः |

## ५.स्वादिगणः षुञ्धातुः(अभिषवे)

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | सुनोति | सुनुतः | सुन्वन्ति |
| म. | सुनोषि | सुनुथः | सुनुथ |
| उ. | सुनोमि | सुनुवः, सुन्वः | सुनुमः, सुन्मः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | असुनोत् | असुनुताम् | असुन्वन् |
| म. | असुनोः | असुनुतम् | असुनुत |
| उ. | असुनवम् | असुनुव, असुन्व | असुनुम, असुन्म |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | सुनुताम् | सुन्वाताम् | सुन्वताम् |
| म. | सुनुष्व | सुन्वाथाम् | सुनुध्वम् |
| उ. | सुनवै | सुनवावहै | सुनवामहै |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | सुनुयात्,सुनुयाद् | सुनुयाताम् | सुनुयुः |

| | | | |
|---|---|---|---|
| म. | सुनुयाः | सुनुयातम् | सुनुयात |
| उ. | सुनुयाम् | सुनुयाव | सुनुयाम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | सोष्यति | सोष्यतः | सोष्यन्ति |
| म. | सोष्यसि | सोष्यथः | सोष्यथ |
| उ. | सोष्यामि | सोष्यावः | सोष्यामः |

## ६.तुदादिगणः तुद्धातुः(व्यथने)

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | तुदति | तुदतः | तुदन्ति |
| म. | तुदसि | तुदथः | तुदथ |
| उ. | तुदामि | तुदावः | तुदामः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अतुदत्, अतुदद् | अतुदताम् | अतुदन् |
| म. | अतुदः | अतुदतम् | अतुदत |
| उ. | अतुदम् | अतुदाव | अतुदाम |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | तुदतात्,तुदतु | तुदताम् | तुदन्तु |
| म. | तुद, तुदतात् | तुदतम् | तुदत |
| उ. | तुदानि | तुदाव | तुदाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | तुदेत्, तुदेद् | तुदेताम् | तुदेयुः |
| म. | तुदेः | तुदेतम् | तुदेत |
| उ. | तुदेयम् | तुदेव | तुदेम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | तोत्स्यति | तोत्स्यतः | तोत्स्यन्ति |
| म. | तोत्स्यसि | तोत्स्यथः | तोत्स्यथ |
| उ. | तोत्स्यामि | तोत्स्यावः | तोत्स्यामः |

## ७.रुधादिगण: रुधिर्धातुः(आवरणे)

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|

| | | | |
|---|---|---|---|
| प्र. | रुणद्धि | रुन्द्धः, रुन्धः | रुन्धन्ति |
| म. | रुणत्सि | रुन्द्धः, रुन्धः | रुन्द्ध, रुन्ध |
| उ. | रुणध्मि | रुन्ध्वः | रुन्ध्मः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अरुणत्, अरुणद् | अरुन्द्धाम्, अरुन्धाम् | अरुन्धन् |
| म. | अरुणः, अरुणत् | अरुन्द्धम्, अरुन्धम् | अरुन्द्ध, अरुन्ध |
| उ. | अरुणधम् | अरुन्ध्व | अरुन्ध्म |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | रुणद्धु, रुन्द्धात्, रुन्द्धाद्, रुन्धात्, रुन्धाद् रुन्द्धाम्, | रुन्धाम् | रुन्धन्तु |
| म. | रुन्द्धात्, रुन्द्धाद्, रुन्द्धि, रुन्धात्, रुन्धाद्, रुन्धि | रुन्द्धम्, रुन्धम् | रुन्द्ध, रुन्ध |
| उ. | रुणधानि | रुणधाव | रुणधामतुद्तात् |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | रुन्ध्यात्, रुन्ध्याद् | रुन्ध्याताम् | रुन्ध्युः |
| म. | रुन्ध्याः | रुन्ध्यातम् | रुन्ध्यात |
| उ. | रुन्ध्याम् | रुन्ध्याव | रुन्ध्याम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | रोत्स्यति | रोत्स्यतः | रोत्स्यन्ति |
| म. | रोत्स्यसि | रोत्स्यथः | रोत्स्यथ |
| उ. | रोत्स्यामि | रोत्स्यावः | रोत्स्यामः |

## ८.तनादिगणः तनुधातुः(विस्तारे)

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | तनोति | तनुतः | तन्वन्ति |
| म. | तनोषि | तनुथः | तनुथ |
| उ. | तनोमि | तनुवः, तन्वः | तनुमः, तन्मः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अतनोत् | अतनुताम् | अतन्वन् |
| म. | अतनोः | अतनुतम् | अतनुत |
| उ. | अतनवम् | अतनुव, अतन्व | अतनुम, अतन्म |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | तनुतात्, तनुताद्, तनोतु | तनुताम् | तन्वन्तु |

| | | | |
|---|---|---|---|
| म. | तनु, तनुतात्, तनुताद् | तनुतम् | तनुत |
| उ. | तनवानि | तनवाव | तनवाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | तनुयात्, तनुयाद् | तनुयाताम् | तनुयुः |
| म. | तनुयाः | तनुयातम् | तनुयात |
| उ. | तनुयाम् | तनुयाव | तनुयाम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | तनिष्यति | तनिष्यतः | तनिष्यन्ति |
| म. | तनिष्यसि | तनिष्यथः | तनिष्यथ |
| उ. | तनिष्यामि | तनिष्यावः | तनिष्यामः |

## ९.क्र्यादिगणः क्रीधातुः(द्रव्यविनिमये)

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | क्रीणाति | क्रीणीतः | क्रीणन्ति |
| म. | क्रीणासि | क्रीणीथः | क्रीणीथ |
| उ. | क्रीणामि | क्रीणीवः | क्रीणीमः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अक्रीणात्, अक्रीणाद् | अक्रीणीताम् | अक्रीणन् |
| म. | अक्रीणाः | अक्रीणीतम् | अक्रीणीत |
| उ. | अक्रीणाम् | अक्रीणीव | अक्रीणीम |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | क्रीणातु, क्रीणीतात्, क्रीणीताद् | क्रीणीताम् | क्रीणन्तु |
| म. | क्रीणीतात्, क्रीणीताद्, क्रीणीहि | क्रीणीतम् | क्रीणीत |
| उ. | क्रीणानि | क्रीणाव | क्रीणाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | क्रीणीयात्, क्रीणीयाद् | क्रीणीयाताम् | क्रीणीयुः |
| म. | क्रीणीयाः | क्रीणीयातम् | क्रीणीयात |
| उ. | क्रीणीयाम् | क्रीणीयाव | क्रीणीयाम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | क्रेष्यति | क्रेष्यतः | क्रेष्यन्ति |
| म. | क्रेष्यसि | क्रेष्यथः | क्रेष्यथ |

| | | | |
|---|---|---|---|
| उ. | क्रेष्यामि | क्रेष्यावः | क्रेष्यामः |

## १०चुरादिगणः चुरधातुः(स्तेये)

१.लट् (वर्तमानार्थकः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | चोरयति | चोरयतः | चोरयन्ति |
| म. | चोरयसि | चोरयथः | चोरयथ |
| उ. | चोरयामि | चोरयावः | चोरयामः |

२. लङ् (अनद्यतनभूतार्थकः)

| | | | |
|---|---|---|---|
| प्र. | अचोरयत्, अचोरयद् | अचोरयताम् | अचोरयन् |
| म. | अचोरयः | अचोरयतम् | अचोरयत |
| उ. | अचोरयम् | अचोरयाव | अचोरयाम |

३. लोट् (विध्याशीः प्रार्थनार्थकः)

| | | | |
|---|---|---|---|
| प्र. | चोरयतात्, चोरयताद्, चोरयतु | चोरयताम् | चोरयन्तु |
| म. | चोरय, चोरयतात्, चोरयताद् | चोरयतम् | चोरयत |
| उ. | चोरयाणि | चोरयाव | चोरयाम |

४. विधिलिङ् (विधिप्रार्थनाद्यर्थः)

| | | | |
|---|---|---|---|
| प्र. | चोरयेत्, चोरयेद् | चोरयेताम् | चोरयेयुः |
| म. | चोरयेः | चोरयेतम् | चोरयेत |
| उ. | चोरयेयम् | चोरयेव | चोरयेम |

५. लृट् (भविष्यदर्थे)

| | | | |
|---|---|---|---|
| प्र. | चोरयिष्यति | चोरयिष्यतः | चोरयिष्यन्ति |
| म. | चोरयिष्यसि | चोरयिष्यथः | चोरयिष्यथ |
| उ. | चोरयिष्यामि | चोरयिष्यावः | चोरयिष्यामः |

**४.शब्दावाली-**

धातुः, प्रत्ययः, सुप्, तिङ्, वाक्यम्, शब्दः, विभक्तिः, नाम, प्रातिपदिकम् इति।

**५.सारांशः-**

१.धातुरूपाणां ज्ञानमभूत्

२.वाक्यरचनायाः कौशलसंपादनमभूत्

३.नूतनानां शब्दानां ज्ञानमभूत्

४.विभक्तीनां ज्ञानमभूत्

**६.सन्दर्भग्रन्थसूची- धातुमञ्जरी, आर. एस्. वाद्यार पालकाटु, २०१४**

**७.सहायकग्रन्थसूची- धातुरूपावली, चौखम्भा, वाराणसी, १९९९**

# खण्डः – ३

## प्रथमादर्शः १ - १२

पाठसंरचना

- प्रस्तावना
- उद्देशयम्
- प्रथमादर्शः-1 तः 12 पाठाः
- बोधप्रश्नाः
- शब्दावली
- अभ्यासप्रश्नाः
- सन्दर्भग्रन्थाः
- सहायकग्रन्थाः

**प्रस्तावना-**

संस्कृतं पठितुं प्रविष्टानां नूतनानां छात्राणां भाषा प्रवेशाय उपयुक्तोऽयं ग्रन्थः- संस्कृतप्रथमादर्श इति। अस्मिन् ग्रन्थे गद्यपद्यद्वारा संस्कृतभाषाम् अवगन्तुं कश्चन सरलः पन्थाः अनुसृतो वर्तते। अस्य पठनेन संस्कृतभाषायां छात्राणां सरलेनोपायेन प्रवेशो भविष्यति।

**उद्देश्यम्-**

- बाल्यकथामाध्यमेन संस्कृतभाषायाः ज्ञानम्।
- धातुरूपाणां ज्ञानम्।
- शब्दरूपाणां ज्ञानम्।
- नूतनानां शब्दानां ज्ञानम्।

## १. सूर्यः प्रत्यक्षदेवता

पश्य, पूर्वस्यां दिशि सूर्य उदयते । तस्य प्रकाशः संप्रति रक्तः कोमलश्च वर्तते । सूर्यः उदयमानोऽन्धकारं नाशयति, प्राणिनः प्रबोधयति, कुसुमानि च विकासयति । सन्तो बालाः सूर्योदयात् पूर्वम् उषसि प्रबुध्य स्वीयान् पाठान् पठन्ति ॥

यदा सूर्यः क्रमेणोगच्छन् नभसो मध्यमारोहति तदा 'मध्याह्नः' । मध्याह्नात् पूर्वो भागः 'पूर्वाह्णः,' अपरो मागः 'अपराह्णः। मध्याह्ने सूर्यस्य प्रकाशः कठोरो भवति । अपरार्द्धे सूर्यः क्रमेण पश्चिमां दिशमवतरति, तस्याम् अस्तं च गच्छति । अस्तमये भूयोऽपि तस्य प्रकाशो रक्तः कोमलश्च भवति ।।

सूर्यस्य भासा सर्वा सृष्टिः प्रकाशते । सूर्येण तुल्यो नान्यस्तेजस्वी वर्तते । सूर्यः प्रत्यक्षदेवता ।। सूर्योपासनया जनाः अरोगाः भवन्ति । 'आरोग्यं भास्करात् इच्छेत्' इति हि महतां वचनम् । सः देवैः असुरैश्च नमस्कृतः ।।

तथा च श्रीमद्वाल्मीकिरामायणे आदित्यहृदयस्तोत्रम् –

**रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।**

**पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ।।**

तस्मात् त्वमपि तं नमस्कुरु ।।

**बोधप्रश्नाः –**

१. सूर्यः कस्यां दिशि उदयते ?

२. स उदय- मानः किं करोति ?

३. सन्तो बालाः कदा प्रबुध्य किं कुर्वन्ति ?

४. अपराह्ण सूर्यः किं करोति ?

५. प्रभाते, मध्याह्ने, सायाहे च सूर्यस्य प्रकाशः कीदृशो भवति ?

६. कया सर्वा सृष्टिः प्रकाशते ?

७. कदा अस्तमयः जायते ?

८. जनः कथम् अरोगः भवति ?

९. महान्तः किं वदन्ति ?

१०. कीदृशं भास्करं जनाः पूजयन्ति ?

❖ विसर्गसन्धिः

- सूर्यः + उदयते = सूर्य उदयते
- रामः + आयाति = राम आयाति
- चन्द्रः + इव = चन्द्र इव
- भृत्यः + एति = भृत्य एति

- बालाः + धावन्ति = बाला धावन्ति

- गजाः + गच्छन्ति गजा गच्छन्ति

## उद्यमः कार्यसाधकः-2

वर्षासु शाकटिकः कश्चित् स्वशकटे भाण्डान्यारोप्य तं नगरान्तरमनयत्। द्वौ वृषौ तं शकटम् अवहताम्। रथ्यायां पङ्के शकटस्य चक्रं रुद्धमभूत्। वृषभौ बलवत् प्रहरन्नपि स शकटं चलयितुं नाक्षमत ।।

ततः स भगवन्तं नारायणं प्रति चुक्रोश। तस्याक्रोशं श्रुत्वा दयालुर्भगवांस्तस्य पुरस्तादाविरभूत्। अभाषत च शाकटिकम्- 'भो मूढ ! किमिति जोषमास्से ? मम साहाय्यं वाञ्छसि चेत् उत्तिष्ठ ! धुर्यों चोदय, चक्रं स्कन्धेन प्रचालय। एवं कृतेऽहं ते सहाय्यं करिष्यामि' इति। एवमुक्त्वा भगवान् अन्तर्धानमकरोत् ।।ततः शाकटिकेन तथा कृते भगवतः साहाय्येन शकटं पङ्कात् निरगच्छत्। यात्रा च शाकटिकस्य निर्विघ्नाऽभूत् ।।

**बोधप्रश्नाः-**

१. शाकटिकः कदा कुत्र शकटमनयत् ?

२. कुतः शाकटिकः शकटं चलयितुं नाक्षमत ?

३. ततः स किमकरोत् ?

४. भगवान् किमभाषत शाकटिकम् ?

५. कदा केन कारणेन शकटं पङ्कात् निरगात् ?

**अकारलोपसन्धिः-**

कृते + अहम् = कृतेऽहम्।

ते अत्र = तेऽत्र ।

विष्णो + अव = बिष्णोऽव ।

एते + अबदन् = एतेऽवदन् ।

**ह्स्वाकारस्य विसर्गस्य च प्रथमम् 'ओकारो' भवति, तदनन्तरं अकार लोप सन्धिः -**

ईश्वरः + अवति = ईश्वरोऽवति ।

सः + अहसत् = सोऽहसत् ।

एषः + अवदत् = एषोऽवदत् ॥

## ३. गोदोहः

इह गोपालः गां पयो दोग्धि । इयं पीवरा गौः। अस्य गोपालस्य तनयः प्रत्यहं प्रभाते दोहात् परमिमां गां प्रचारभूमिं नयति सायं च प्रत्यानयति । यद्यपि, गावः पलालं धान्यमन्नं पिण्याकं च भक्षयन्ति तथापि बालवृणे तासां महती प्रीतिः ।॥

गोः समीपे तिष्ठति वत्सः । स प्रथमं गोः पयः किञ्चित् पिवति । अनन्तरं गोपो दोहनं करोति । स गोः पार्श्वे भूमावुपविश्य वामहस्तेन पात्रं गृहीत्वा दक्षिणहस्तेन दुग्धं दोग्धि। धेनोः क्षीरं, मधुरं पथ्यं पुष्टिकरं च ।।

तत्रैका नारी बालकेन सह तिष्ठति । सा क्षीराय समागता । तं बालं सा पयसा पोषयति। तेन स बुद्धिमान् अरोगश्च वर्तते ।।

क्षीरं तक्रेण मिश्रितं दधि भवति । दधि मथित्वा नवनीतं गृह्यते । तप्तं नवनीतं घृतं सम्पद्यते । क्षीरं दधि तक्र नवनीत घृतं च मनुष्याणामत्यन्तमुपयुक्तानि वस्तूनि । तानि भोजनाय उपयुज्यन्ते । तानि विना भोजनं न रसकरं भवति । अत एवाहुः ' विना गोरसं को रसो भोजनानाम् । - इति ॥

गां मातरमिव पूजयन्ति भारतीया जनाः । उक्तं च श्रीमन्महाभारते -

'मातरः सर्वभूतानां गावः सर्वसुरबप्रदाः - इति ।।

**बोधप्रश्नाः –**

१. गोपालः किं करोति ?

२. गावः किं किं भक्षयन्तिः?

३. कस्मिन् तासां महती प्रीतिः ?

४. गोपालः कथं दुग्धं दोग्धि ?

५. गोः क्षीरं कीदृशम् ?

६. केन स बालः बुद्धिमान् अरोगश्च वर्तते ?

७. दधि नवनीतं घृतं च कथं सम्पद्यन्ते ?

८. मनुष्याणाम् अत्यन्तमुपयुक्तनि वस्तूनि कानि

९. गां कामिव पूजयन्ति भारतीया जनाः? तत्र कारणं किम् ?

**आकारात् परं विसर्गलोपसन्धिः -**

भजाः+अटन्ति =अजा अटन्ति ।

नराः इमे= नरा इमे।

जनाः+ यान्ति = जना यान्ति ।

वृक्षाः एते = वृक्षा एते ।

## चतुर्थः पाठः - स्वयकृतोऽनर्थः

जातु काष्ठविक्रेता कश्चित् काष्ठार्थं वनमगच्छत् । तत्र स कच्चिदासीनः परितो विलोक्य विलपितुमारभत । तं विलपन्तं वीक्ष्य तस्मिन् वने स्थितास्तरवः करुणया तमपृच्छन्--' किं निमित्तं विलपसि ?' - इति । सोऽवदत् - 'मम कुठारस्य नालं नास्ति । तेनाहं कर्म कर्तुमशक्तोऽस्मि । अतो भोज्यालाभात् विलपामि' - इति ॥

ततः सर्वे तरवः समेत्य तस्मै कृपयैकं चिश्चालगुडे ददुः । काष्ठच्छित् तं कुठारे संयोज्य तस्मिन् वने स्थितान् कतिचित् वृक्षान् अच्छिनत् ।।

तदा अन्ये वृक्षा रोदितुमारभन्त । तदवलोक्य सहकारवृक्षस्थान् प्राह - भो ! बालिशाः ! किमिति विलपथ ? नायं तस्य दोषः । स्वयंकृत एवायमनर्थोऽस्माभिः नालस्य दानेन' इति ।

**बोधप्रश्नाः-**

१. काष्ठविक्रेता किमर्थं कुत्र अगच्छत् ?

२. तत्र किं कर्तुमारभत ?

३. के तं करुणया किमपृच्छन् ?

४. काष्ठच्छित् किं प्रत्यवदत् ?

५. तस्मै ते किं ददुः ?

६. काष्ठच्छित् किमकरोत् ?

७. तदा अन्ये वृक्षाः किमकुर्वन् ?

८. सहकारवृक्षस्तान् किं प्राह ?

९. अनर्थः कथं स्वयंकृतः अभवत् ?

**विसर्ग सन्धिः- ('अः' इत्यस्य ओकारः भवति)**

इतः + गच्छति = इतो गच्छति ।

स्वतः + जायते = स्वतो जायते ।

## ५. श्रीरामपट्टाभिषेकः

अथायोध्यानिवासास्ते जनास्सर्वेऽपि तोषिताः। अभिगम्याब्रुवन् रामं धन्या वयमिति द्रुतम् ॥ १

चातकास्तु घनान् दृष्ट्वा मयूराश्च यथा शिशून्। आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि ॥ २

अथाभिषेकं रामस्य वसिष्ठाद्याः मुदाऽन्विताः ।सहिता मन्त्रिभिश्चक्रुः वसवो वासवं यथा ॥ ३

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः । यथार्हं पूजिताश्चासन् स्रग्गन्धाम्बरभूषणैः ॥ ४

विशिष्य मुक्ताहारेण सीतया हनुमान् मुदम् । पूजितश्च तथा लेभे यथा सीतावलोकने ॥ ५

पितुः सिंहासनं प्राप्य भ्रातृभिः सहितोऽनघः । विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे ।। ६

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् । भरतायाप्रमेयाय प्राणात् प्रियतराय सः ।। ७

चत्वारस्ते महात्मानः सभार्या रघुसत्तमाः । खे सतारो यथा चन्द्रः तथा रेजुः स्वपत्तने ।। ८

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् । ररक्ष लोकान् वैकुण्ठः स मां रक्षतु चिन्मयः ॥ ९

**मङ्गलश्लोकः**

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।

चक्रवर्तितनुजाय सार्वभौमाय मङ्गलम् ।।

**बोधप्रश्नाः** -

१. श्रीरामं के किम् अब्रुवन् ?

२. जनाः तोषं प्रापुः-अत्र दृष्टान्ताः के ?

३. रामस्य अभिषेकमहोत्सबे के कथं पूजिताः ?

४. हनूमान् कथं मुदं प्राप ? '

५. रामः कथं विरराज ?

६. यौवरराज्यं रामः कस्मै दत्तवान् ?

७. चत्वारः महात्मानः के ? कथं रेजुः ॥

## सन्धिः -

हरिः + अच्यते = हरिरर्व्यते ।

गुरुः + एति = गुरुरेति ।

घेनुः + गच्छति घेनुर्गच्छति ।

गौः + दुह्यते = गौर्दुश्ह्यते ॥

## ६. अश्वः

इह कश्चिदश्वस्तिष्ठति । गोरश्वस्य च को भेदः ? अश्वो गवापेक्षया प्रांशुः । अश्वस्य पादाः दीर्घतराः । तस्य श्रीवायां रोमराजिर्वर्तते । अश्वस्य श्रृङ्गे न स्तः । गोः सफो द्वेधा दलितः, अश्वस्य तु न । अतोऽश्वः शीघ्रतरं धावति ।।

अयमश्वो रथे बध्यते । कैश्चित् द्वावश्वौ रथे बध्येते । राजानो धनिकाश्चोत्सवदिवसेषु चतुरः ततोऽधिकान् वा तुरगान् रथे योजयन्ति । समवर्णैः बहुभिरश्वैः युक्तो रथः सुरम्यो भवति ।।

कश्चिदश्वस्तिष्ठति । गोरश्वस्य च को भेदः ? अश्वो गवापेक्षया प्रांशुः । अश्वस्य पादाः दीर्घतराः । तस्य श्रीवायां रोमराजिर्वर्तते । अश्वस्य श्रृङ्गे न स्तः । गोः सफो द्वेधा दलितः, अश्वस्य तु न । अतोऽश्वः शीघ्रतरं धावति ।।

अयमश्वो रथे बध्यते । कैश्चित् द्वावश्वौ रथे बध्येते । राजानो धनिकाश्चोत्सवदिवसेषु चतुरः ततोऽधिकान् वा तुरगान् रथे योजयन्ति । समवर्णैः बहुभिरश्वैः युक्तो रथः सुरम्यो भवति ।।

अश्वाः सुशिक्षिताः सञ्चारायोपयुज्यन्ते । वनमार्गेषु जनाः प्रायेणाश्वैरेव सञ्चारं कुर्वन्ति । अश्वस्य पृष्ठे पर्याण- मास्तीय तस्मिन्नुपविशत्यश्वारोहः । मुखबद्धं खलीनमाकर्षन्

सोऽश्वं नयति ।।

अश्वाः सङ्ग्रामेषु राज्ञां साह्यमाचरन्ति । ते रणाङ्गणे महत् कौशलं प्रदर्शयन्ति । कदाचित् ते योधानां प्राणानपि रक्षन्ति । अतः प्राधान्येन राजानोऽश्वसैन्यं सर्वदैव संरक्षन्ति ।।

बोधप्रश्नाः-

१. गौः अश्वस्य च भेदं निरूपयत ।

२. कुतोऽश्वः शीघ्रतरं धावति ?

३. कति अश्वा रथे बध्यन्ते ?

४. अश्वैः कः उपयोगः ?

५. कुतो राजानः सर्वदैव अश्वसैन्यं संरक्षन्ति ?

❖ विसर्ग सन्धिः – (विसर्गस्य 'सकारः' भवति)

अश्वः + तिष्ठति = अश्वस्तिष्ठति ।

पयः + समुद्रः = पयस्समुद्रः ॥

## ७. श्रृगालस्य कौशलम्

चित्रेऽस्मिन् एकः श्गालोऽजस्य पृष्ठे पदं निधाय तिष्ठति । कथय, किं निमित्तं स तथा तिष्ठति ?अयं श्गालः पानीयं पातुं बापीं गतो जले ममज्ज । तेन वहिर्गन्तुं वहत्रो यत्नाः कृताः । किन्तु ते सर्वे मुघाऽभवन्।

अत्रान्तरे कोऽप्यजः पिपासाकुलः परिभ्रमन् तत्रागतः । अपृच्छच्च श्गालम् ' सखे अपि मधुरं जलम्' इति । श्गालः परेषां वञ्चने नितरां पटुः। अतः स आह- मधुरभिति किमुच्यते ! केवलं पीयूषमेव ! प्रभूतं पिचतोऽपि न मे वाञ्छा निवर्तते ।।

न शक्नोम्येतां वापीं हातुम्' इति ॥ अजस्ता वद्दजुबुद्धिः । अतः स वञ्चकस्य वचन सत्यं मत्वा शनैरन्तः प्रविशति । ऊर्ध्वमुखमवरोहतस्तस्य पृष्ठे पदं निघाय वापीतः समारोहति श्गालः । अजस्तु वाप्यामेव मज्ञनोन्मज्ञने कुर्वन् विपेदे । पश्यत ! श्गालस्य कौशलम् ।।

बोधप्रश्नाः-

१. किमर्थं श्गालः अजस्य पृष्ठे पदं निधाय तिष्ठति ?

२. अयं श्रृगालः कथं वाप्यां पतितः ?

३. अजः श्गालं किमपृच्छत् ?

४. कथं श्रृगालो वापीतः समारोहत् ?

५. अजः कथं विपेदे ?

❖ विसर्ग सन्धिः- (विसर्गस्य 'श' कारः, 'ब' कारः, 'स'- कारो वा भवति)

पूर्णः + चन्द्रः = पूर्णश्चन्द्रः ।

धनुषः + टङ्कारः = धनुषटङ्कारः।

अलसः + शेते = अलसश्शेते ।

बजः + तु = अजस्तु ।

## ८. व्याघ्रचित्रकौ

व्याघ्रो वन्यः पशुः । सः हिंस्राणां मृगाणां मध्येऽतीव क्रुः । इतरेभ्यः पशुभ्यो व्याघ्रः शीघ्रतरं धावति । व्याघ्रस्य देहे सर्वत्र कृष्णा विन्दवो रेखाश्च सन्ति । यदि तस्य स्वभावः शान्तोऽभविष्यत् तर्हि जनास्तं मृगान्तरापेक्षया अधिकतरम् आद्विष्यन्त ॥

चित्रकस्तु व्याघ्रादपि सुन्दरः । चित्रकायः इत्यप्ययं व्यपदिश्यते । एकदा चित्रकः कश्चित् स्वस्य रूपेण गर्वितो भूत्वा मृगसभायामेवमब्रवीत् - ' सिंहो न मम तुलां भजते । अतोऽहमेव मृगराज्येऽभिषेक्तव्यः' इति ।।

तेषां मध्यतः क्रोष्टोवाच - आर्य ! त्वमेकं गजं निहत्य मृगपरिवारं तर्पय; येन त्वां मृगराज्येऽभि-पेक्ष्यामः' - इति । तद्वचनं श्रुत्वा लज्जितश्चित्रकः -

' इदानीमेव आगमिष्यामि इत्युक्त्वा ततः प्रस्थितः तद्वनमेव परित्यज्य गतः ॥

**बोधप्रश्नाः -**

१. व्याघ्रः कीदृशः पशुः तम् अधिकृत्य द्वित्राणि वाक्यानि बदत ।

२. चित्रकः कीदृशः ?

३. रूपेण गर्वितः चित्रकः मृगसभायां किमब्रवीत् ?

४. क्रोष्टा किमुवाच ?

५. चित्रकः किमकरोत् ?

**सन्धिः- (विसर्गस्य विकल्पेन जिह्वामूलीयः (ᳵ) भवति)**

व्याघ्रः + कथयति = व्याघ्र कथयति, व्याघ्रः कथयति ।

सुरूपः + खगः - सुरूप खगः, सुरूपः खगः।

वन्यः + पशुः = वन्य पशुः, वन्यः पशुः ।

वृक्षः + फलति = वृक्ष फलति, वृक्षः फलति ॥

## ९. अश्वसारङ्गयोः कथा

कश्चिदश्वः सारङ्गश्चैकस्मिन् केदारे नित्यं चरतः, महता च स्नेहेन कालं नयतः । एवं स्थिते तौ जातु कलहपरो जातौ । तयोः सारङ्गः शृङ्गबलेनाश्वं केदारान्निरवासयत् ।।

ततः सारङ्गस्य प्रतीकारं कर्तुमिच्छन्नश्वः कश्चिन्मनुजं प्राप्य तस्य साहाय्यं ययाचे । स मनुजः परं प्रहृष्टः तस्य पृष्ठे पर्याणमारोप्य मुखे खलीनं दत्त्वा तमारोहत् । तस्य गतिं परीक्षमाणः कशया तं तीव्रमताडयत् । स्वकार्यार्थी तत् सर्वमसहताश्वः । तस्य मनुष्यस्य साहाय्येन सोऽश्व सारङ्गमजयत् ।।

कृतकृत्यः स तुरगो मनुजं निजगाद् सिद्धं मे समीहितमधुना । पर्याणं खलीनं चापनीय मां गमनायानु- मन्यस्व' इति । तन्निशम्य मनुजस्तं बभाषे मया तवैतावत् प्रयोजनमिति जानाम्यहम् । किन्त्वितः परं त्वया मे प्रयोजनं भविष्यति । कथमहं त्वां विसृजेयम्' इति ॥

ततो यावज्जीवं सोऽश्वः तस्य मनुजस्य वाजिशालायां बन्धने स्थितः परतन्त्रतया परां पीडामन्वभूत् । परतन्त्रस्य कुतः सुखम् ?

उक्तं च सुभाषितरत्नाकरे -

'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ' - इति ।।

बोधप्रश्नाः

१. कौ एकस्मिन् केदारे नित्यं चरतः, तौ कथं कालं नयतः ?

२. एवं स्थिते तौ कीदृशौ जातौ ?

३. कः केन अश्वं केदारान्निरवासयत् ?

४. कथमश्वः सारङ्गन्मजयत् ?

५. कृतकृत्यः स तुरगो मनुजं किं जगाद ?

६. मनुजस्तं किं बभाषे ?

७. अश्वः कीदृशं फलमन्वभवत् ?

८. अस्मिन् पाठे उपदेशः कः ?

❖ सन्धिः- (सः, एषः, इत्यनयोः विसर्गस्य लोपः भवति)

सः + याति = स याति ।

सः + कथयति = स कथयति ।

एषः + धावति = एष धावति ।

एषः + पचति = एष पचति ॥

# १०. कोकिलः

नायं सुरूपो विहगो नापि कायोऽस्य भासुरः ।

न चास्य पक्षयोः सन्ति चित्रवर्णा विशेषकाः ।।1

केवलं काकसदृशो रूपे वर्णेऽप्ययं खगः ।

अथापि मधुरं गायन् अयं जगति पूज्यते ।।२

रसालशिखरासीनो वसन्ते मधुरं स्वनन् ।

कस्य नो हृदयानन्दं जनयत्येष कोकिलः ।।३

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।

वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः ॥४

किं कुलेन विशालेन किं रूपेण सुशोभिना ।

महत्त्वे कारणं तावत् वाग्रसो जनरञ्जकः ।। ५ ॥

**बोधप्रश्नाः-**

१. कोकिलः कीदृशो विहगः ?

२. काकः कोकिळश्च कथं सदृशौ ?

३. कोकिलः कथं हृदयानन्दं जनयति ?

४. कदा काकः काकः पिकः पिकश्च भवतः ?

५. कः उपदेशो युष्माभिः पाठादस्मात् गृह्यते ?

६. महत्वस्य कारणं किम् ? किं न ?

❖ **गुणसन्धिः**

अत्र + इदम्= अत्रेदम् ।

यथा + इच्छसि = यथेच्छसि ।

जलस्य + उद्धरणम् = जलस्योद्धरणम् ।

रमा + उवाच = रमोवाच ॥

# ११. कूपः

अयं रमणीयः कूपः । पानाय योग्यं जलं कूपे लभ्यते । सरसो जलं स्नानेन मलिनं भवति । नद्याः सलिलं प्रकृत्यैव कलुषम् । समुद्रस्य वारि लवणम् । कूपस्य उदकम् अनाविलं पानयोग्यं च भवति ।।

चित्रं पश्य । कूपस्य समन्तात् बहूनि सन्ति क्षेत्राणि । ततो नातिदूरे दृश्यन्ते कतिचन गृहाणि । तेषु गृहेषु वसन्त्यः स्त्रियः अस्मात् कूपाज्जलं नयन्ति ॥

अस्य कूपस्य समीपे चतस्रः स्त्रियः सन्ति । द्वे स्त्रियौ जलघटं शिरसि निधाय गच्छतः । अपरा कूपाज्जलमुद्धरति । अन्या जलमुद्धर्तुं घटहस्ता तिष्ठति ।।

अयमगाधः कूपः । अतोऽस्मात् कूपाज्जलस्योद्धरणाय दारुचक्रमुपयुज्यते । पश्य, कूपस्य पार्श्वयोः द्वौ स्तम्भौ निखातौ । तयोरुपरि तिर्यक् दारुदण्डो योजितः । तस्य मध्ये

दारुचक्रं पिनद्धम् । तस्य चक्रस्यान्तराले रज्जुः प्रवेशिता । तस्या रज्जोरग्रेण घटं कण्ठे बद्ध्वा तं

कूपेऽवतारयन्ति, जलं चोद्धरन्ति । दारुचक्रस्य स्थानेऽयश्चक्रमपि कैश्चिदुपयुज्यते। अद्यत्वे भूयसा

वैद्युतशक्तिमुपयुज्य यन्त्रेण जनाः कुष्याद्यर्थं

कूपात् जलम्मुद्धरन्ति ॥

**बोधप्रश्नाः-**

१. पानाय योग्यं जलं कुत्र लभ्यते ?

२. सरसः समुद्रस्य नद्याः कूपस्य व जलं कीदृशम्

३. अस्य कूपस्य समीपे स्थिताः स्त्रियः किं कुर्वन्ति ?

४. अय कीदृशः कूपः ?

५. अस्मात् कूपात् कथं जलमुद्धरन्ति !

६. जलस्य उद्धरणाय किं किम् उपयुज्यते !

**वृद्धिसन्धिः-**

मम + एव = ममैव ।

न + ऐच्छत् = नैच्छत् ।

वन + ओषधिः बनौषधिः ।

दिव्य औषधम् - दिव्यौषधम् ॥

## १२. वानरक्रीडा

अस्मिन् वृक्षे केचिद्वानराः क्रीडन्ति । ते वृक्षावृक्षं विटपाद्विटपं च प्लवन्ते । वानराः प्रायेण नरैस्तुल्यरूपाः । अथापि नरा इव गृहाणि खगा इव नीडानि वा कर्तुं न ते शक्नुवन्ति । सर्वदैव ते वृक्षेषु निवसन्ति । कन्दैः फलैश्चोदरं पूरयन्ति । वानराः स्वभावात् एव चपलाः कोपनाश्च । काचित् कथा श्रूयते यथा - एकदा वर्षासु कश्चिद्वानरः शैत्येन बाधितो दन्तवीणां वादयन् कस्यचन शमीतरोर्मूलमाससाद । तस्मिन् वृक्षे कुलायं कृत्वा चटकदम्पती निवसतः स्म । तयोः चटका शैत्येन कम्पमानं वानरमवलोक्य करुणया प्राह -

**" नीडं कुर्मो वयं चापि चञ्चुमात्राहृतैस्तृणैः ।**

**पाणिपादादिसंयुक्ता यूयं किमिति सीदथ ? " इति ।**

तदाकर्ण्य वानरस्तामाह- दुष्टे ! अलं जल्पनेन; तूष्णीमास्स्व' - इति । सा तु करुणाविष्टा पुनः पुनस्तदेव वचनमभ्यधात् ।।

तेन कुपितो मर्कटः- सूचीमुखि ! दुराचारे ! किं प्रलपसि' इति वदन् शमीवृक्षमारुह्य तस्याः कुलायं शतधा भङ्क्त्वा क्षितावपातयत् ।।

**बोधप्रश्नाः-**

१- अस्मिन् वृक्षे वानराः किं कुर्वन्ति ?

२. ते कुत्र निबसन्ति ?

३. कैश्चोदरं पूरयन्ति !

४. मर्कटाः कीदृशाः !

५. वानरः कथं शमीतरोः मूलमाससाद् ?

६. तस्मिन् वृक्षे कौ निवसतः स्म ?

७. वानरमत्रलोक्य का किं प्राह ?

८. वानरस्तां किमाह ?किमकरोद् ?

९. सा किमकार्षीत् ?

१०. तेन कुपितो बानरः

**सन्धिः-**

लघु + आहारः = लध्याहारः ।

इति + आह = इत्याह ।

मातृ + आशीः मात्राशीः ॥

**शब्दावली-**

सूर्यः, मध्याह्नः, अपराह्नः, शकटम्, नारायणः, चक्रम्, गोपालः, गावः, मत्सः, दधि, कश्चित्, विलपन्तम्, कुठारः, तरवः, रामः, मयूरः, वसिष्ठः, सिंहासनम्, चन्द्रः, अश्वः. शृङ्गः, रथः, तुरगः, शृगालः, मधूरम्, कौशलम्, व्याघ्रः, मृगः, सारङ्गः, बन्धनम्, कोकिल-, कूपः, समुद्रः, वानरः, कथा इत्यादयाः।

**अभ्यासप्रश्नाः**

1. सूर्यः प्रत्यक्षदेवता इति पाठस्य सारांशं लिखत।
2. उद्यमः कार्यसाधकः इति पाठस्य सारांशं लिखत।
3. गोदोहः इति पाठं यथाग्रन्थं विशदयत।
4. स्वयंकृतोऽनर्थः इति पाठं यथाग्रन्थं विशदयत।
5. श्रीरामपट्टाभिषेकः इति पाठस्य सारांशं विशदयत।
6. शृगालस्य कौशलम् इति पाठं वर्णयत।

**सन्दर्भग्रन्थसूची-**

1. संस्कृतप्रथमादर्शः- आर. एस. वाद्यार एन्ड सन्स, पालकाड भारत, 2014

**सहायकग्रन्थसूची-**

1. शब्दमञ्जरी- आर. एस. वाद्यार एन्ड सन्स, पालकाड भारत, 2014

# खण्डः – ४

पाठसंरचना

- प्रस्तावना
- उद्देशयम्
- प्रथमादर्शः-१३ तः २४ पाठाः
- बोधप्रश्नाः
- शब्दावली
- अभ्यासप्रश्नाः
- सन्दर्भग्रन्थाः
- सहायकग्रन्थाः

**प्रस्तावना -**

शब्दधातुरूपाणामाध्ययनात् परं छात्रस्य विशेषजिज्ञासा उदेति यत् कुत्र एतेषां पदानां प्रयोगः कर्तव्यः इति। तथा कृते सति तस्याः भाषायाः शुद्धस्वरूपम् अवगन्तुं शक्नोति। नास्ति चेत् भाषायाः यः असाधारणः रसः सः ज्ञातुम् अशक्यो भवेत्। तदर्थं छात्राणां वाक्यरचनायां प्रयासः अपेक्षितः। तदर्थं लघुकथारूपेण वाक्यरचनायाः परिचयः अत्र क्रियते। क्लिष्टपदानि विहाय प्रसिद्धपदानि आदायैव यथा सुगमः बोधः भवति तथा अत्र क्रियते। प्रकृते एका कथा स्वीक्रियते। सा च मयूरकथा। तत्र एका नीतिरपि परिस्फुरति। तेन छात्राणाम् अलौकिकं प्रयोजनमपि सिद्ध्यति।

**उद्देश्यम् -**

कथारूपेण संस्कृतभाषायाः अध्यापने उद्देश्यं भवति सुखावबोधः एव। नीतिबोधककथायाः प्रयोजनद्वयं भवति। एकं छात्राणां चित्तशुद्धिः, अपरं संस्कृतभाषायां कुशलता। मध्ये मध्ये व्याकरणपरिचयः अपि दीयते चेत् एतत्सदृशपदान्तरेभ्योऽपि छात्राणां सुष्ठु ज्ञानं संपद्यते।

## १३. मयूरः

इदं किमपि रमणीयमुद्यानम् । अत्र द्वौ मयूरौ एका मयूरी तरवो लताः प्राकारश्च दृश्यन्ते । एको मयूरः पिच्छानि विस्तृत्य नृत्यति । अपरः पिच्छानि संवृत्य प्राकारस्योपरि तिष्ठति । तेन सह मयूरी अपि तत्र तिष्ठति । मयूर्याः पिच्छभारो नास्ति । नापि सा रम्या ।।

मयूराणां बर्हेषु चित्रवर्णा अर्धचन्द्राकृतयो विशेषकाः सन्ति । ते जनानां चक्षूंषि रमयन्ति । एतैः मयूराणां बर्हैः व्यजनानि क्रियन्ते । केचित् तानि भूषणत्वेन धरन्ति ॥

मयूरा वर्षासु मेघस्य शब्दं श्रुत्वा प्रहृष्टाः नृत्यन्ति ।बर्हाणि विस्तृत्य नृत्यन् मयूरः फुल्लकुसुमो बालवृक्ष इव विभाति । तस्य केकारवस्तु काकस्वरवत् परुषः । अथापि तस्य रूपमतीव मनोहरम् । अतो मयूरान् गृहीत्वा धनिनो जनाः पुष्पोद्यानेषु संरक्षन्ति ।।

**बोधप्रश्नाः**

१. इदं कीदृशमुद्यानम् ?

२. तत्र के के वर्तन्ते?

३. मयूरौ किं कुरुतः ?

४. प्राकारे कौ तिष्ठतः ?

५. मयूराणां पिच्छैः कः उपयोगः ?

६. मयूराः कदा नृत्यन्ति ?

७.. कः फुल्लकुसुमे बालवृक्ष इव विभाति ?

८. केकारवः कीदृशः ?

९. कुतः जनाः मयूरान् गृह्णन्ति ?

**सवर्णदीर्घसन्धिःउदाहरणम् –**

- जगाम + असौ = जगामासौ ।
- इति + ईरयति = इतीरयति ।
- गुरुः + उपदेशः = गुरूपदेशः ।

**अधः निर्दिष्टेषु सन्धि दर्शयत**

- अत्र + आसीत्
- गच्छति इव
- वधू+उद्वाहः

## १३- मृगणां पक्षिणां च समयः

कृषीनलः कश्चिदरण्यपरिसरभूमौ वसति स्म । जातु तस्य कुक्कुटः केदारे भक्ष्यमन्विष्यन्नास्त । जम्बुकः कश्चन बुभुक्षितः परिभ्रमन् तमुद्देशमागतः । कुक्कुटस्तमवेक्ष्य समीप-स्थस्य तरोः शिखरमारोहत् ।

वञ्चको भग्नाशस्तरोर्मूलमासाद्य कुक्कुटं प्रलोभयन्नाह- 'भद्र ! किमिति मां दृष्ट्वा वृक्षमारूढवानसि? अद्य खलु, मृगैः पक्षिभिश्च सर्वैः सम्भूय समयः कृतः ।

तत्रैव निर्णीतम् 'न कोऽपि कस्मा अपीतः परं द्रुह्येत् । न च कञ्चन हन्यात् । न कमपि पीडयेत् । किन्तु सर्वैः स्नेहेन वर्तितव्यम्। य एनं समयमुल्लङ्घते स तीव्रं दण्डयेत् इति । तेनाहं त्वां स्नेहेनालिङ्गितुं समागतः। कथं त्वं मत्तो बिभेषि ? " - इति । कुक्कुट आह- सखे ! सत्यमुक्तं भवता । परं त्वं बुभुक्षित इव दृश्यसे । अतः कथं वृक्षादवरोहेयम् ! - इति ।।

एवं वदत्येव तस्मिन् नातिदूरे व्याघ्रः कश्चित् समाययौ । कुक्कुटः शिरोधरामुन्नमय्य तमीक्षाञ्चक्रे। गोमायुस्तमपृच्छत् - ' भद्र ! किं सादरं वीक्षसे? कुक्कुट आह- सखे ! नातिदूरे व्याघ्र आगच्छति। क्रोष्टा भीतः भद्र ! यद्येवं नमस्ते । समयान्तरे त्वां भूयो द्रक्ष्यामि' इत्युक्त्वा प्रस्थितः ।।

कुक्कुटस्तं सस्मितमाह - हंहो मा गमः । अहे तरोरवरोहामि । त्वं मां स्नेहेनालिङ्गिष्यसि । 'सर्वैः स्नेहेन वर्तितव्यम्' इति समये स्थिते किमिति त्वं व्याघ्राद्भीतः !'- इति । श्गालः 'न खलु घातुकाः समयमनुवर्तिष्यन्ते ! इति, वदन् द्रुतं पलायितः ।।

**बोधप्रश्नाः** -

१. कुक्कुटः किन्निमित्तं तरोः शिखरमारोहत् ?

२. मृगैः पक्षिभिश्च सम्भूय कः समयः कृतः ?

३. व्याघ्रः कदा कुत्र समाययौ ?

४. कुक्कुटः सस्मितं किम् आह?

५. किं वदन् जम्बुकः द्रुतं पलायितः ?

६. जम्बुकस्य पर्यायान् वदत ।

**सन्धिः**-

- एते + आगताः = एतयागताः, एत आगताः ।
- शम्भो + एहि = शम्भवेहि, शम्भ एहि ।
- तस्मै + आह = तस्मायाई, तस्मा आह।
- मघौ + इह = मधाविह, मधा इह ॥

## १५.प्रश्नोत्तरमाला

- कुत्र विधेयो यत्नः ?

  विद्याभ्यासे परोपकारे च ।

- अवधीरणा क्व कार्या ?

  परनिन्दायां परधने च ॥

- कुत्र विधेयो वासः ?

  सज्जनसविधे सदा सौम्ये ।

- परिहार्यो देशः ?

  पिशुनजनैः सङ्कुलीभूतः ।।

- कोऽन्धः ?

  योऽकार्यरतः ;

- को बधिरः ?

  यः श्रृणोति नान्योक्तिम् ॥

- को मूकः ?

  यः काले प्रियाणि वक्तुं न जानाति ॥

- को धर्मः ?

  भूतदया

- कि सौख्यन् ?

  नित्यमरोगिता जगति ।

- कः स्नेहः ?

  सद्भावः

- किं पाण्डित्यं ?

  परिच्छेदः ।

**धातूपसर्गौ**

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।**

**प्रहाराहार संहार विहार परिहारवत् ॥**

1. प्र + हरति = प्रहरति

2. आ + हरति =आहरति

3. सं + हरति= संहरति

4. वि + हरति =विहरति

5. परि + हरति =परिहरति

## १६. शुकः

अत्रैकः शुकः पञ्जरे बद्धस्तिष्ठति । पञ्जरात् बहिः शाखायां स्थिता शुकी तस्य माता । सा स्वशाबकं बद्धमवलोक्याश्रु मुञ्चन्ती तेन सह भाषते । सा तं किं वदतीति किं जानासि ? सा तं वदति-

'वत्स ! उक्तं खलु मया न त्वया कोटरान्निर्गन्तव्यम्, कोऽपि त्वां गृह्णीयात् - इति । मम वाक्यमानादृत्य क्रीडितुं कुसुमलतां गतस्त्वम् । यथा मया कथितं तथैव संवृत्तम्' - इति ।

शुकस्तामाह - अम्ब ! मातुर्वाक्यम् अनुल्लङ्घनीयमिति जानाम्येव । अथापि क्रीडासक्तेन मया चापल्यात् तन्नालोचितम् । सा प्राह 'जात ! एवं गते त्वयि कथं त्वदेक- पुत्रया मया आयुश्शेषो नेयः ?' सोऽपृच्छत्- ' किमेवं वदसि ? किं मम मुक्तिरेव न स्यादस्मात् पञ्जरात् । सा कथयति - "दृढतराः पञ्जरस्य शलाका निबिडतराश्च । यथा त्वं न पलायेथास्तथा गृहस्वामी जागरूको भविष्यति । कथं ते मुक्तिर्भविष्यतिः।।

अत्रान्तरे गृहस्वामी फलहस्तः समागतः । शुकी पलायिता । गृहस्वामी शुकमिमं फलेन रुचिरेणान्नेन च पोषयिष्यति । भाषणं च तं शिक्षयिष्यति । शिक्ष्यमाणाः शुका मनुष्या इव व्यक्तां वाचमुदीरयन्ति। वेदमन्त्रानपि ते पठन्ति । अयमेव शुकानां बन्धने हेतुः ।।

शुकानां रूपमपि रमणीयम् । तेषां पक्षौ हरितौ, चञ्चवश्चरणाश्च लोहिताः । केचन शुकाश्चित्रवर्णाः । तेऽतीव रमणीयाः ।।

**बोधप्रश्नाः**

१. शुकस्य माता कुत्र स्थिता ?

२. सा पञ्जरस्थं शुकं किं वदति?

३. शुक तां किमाह ?

४. शुकस्य पञ्जरात् मुक्तिः कुतो न भवेत् ?

५. कुत्रान्तरे गृहस्वामी समागतः ?

३. गृहस्वामी किं करिष्यति ?

७. कः शुकानां बन्धने हेतुः ?

८. केऽतीव रमणीयाः शुकाः?

९. अनया कथया कः उपदेशः गृह्यते !

**सन्धत्त –**

- वने + अवसत् = ।
- हरे + अव = ।
- गुरो + अध्यापय = ।
- ते + अवदन् = ।

## १७. उलूखलं मर्दलश्च

कस्मिंश्चित् गृहे भजनोत्सवानन्तरं रात्रौ मर्दलः कश्चिदुलूखलस्य समीपे स्थापितः । मित्रमन्तिके दृष्ट्वा मर्दलः कुशलं पृच्छंस्तेन सह सम्भाषते ।

मर्दलः- सखे ! अपि कुशलं भवतः ? अस्मिन् देशे का वार्ता ?

उलूखलम् - मित्र ? अस्मिन् देशे मां विहाय सर्वेऽपि कुशलिन एव । अहं परं मन्दभाग्यम् !

मर्दलः - कुतस्त्वं मन्दभाग्यम् ? कस्ते दुःखहेतुः ?

उलूखलम् - सखे ! किं ब्रवीमि ! तथापि श्रूयताम् - दुर्भगस्य मे शिरसि धान्यानि निधाय स्त्रियः पुरुषाश्च मां

मुसलेन निर्दयं ताडयन्ति । केचिदयोदण्डेनापि मां प्रहरन्ति इत्थं प्रत्यहं महतीं पीडामनुभवामि । किमतः परं कष्टं स्यात् ?

मर्दलः - भद्र ! किमिदं मयि निवेद्यते । अहं त्वत्तोऽपि मन्दभाग्यः । त्वं शिरसि परं ताड्यसे । मां तु ताडने समर्थाः जनाः पार्श्वद्वयेऽपि हस्ताभ्यां ताडयन्ति । विशेषतश्च विवाहोत्सवादौ सभामध्ये तीव्रं ताडयन्तो मामवजानन्ति । नैकोऽपि मामनुशोचति । किन्तु सर्वेऽपि सहर्षं शिरः कम्पयन्तो मम ताडनमभिनन्दन्ति । हन्त ! कस्य वाऽन्यस्य स्यादीदृशी दुर्दशा । लोके हि प्रायेण नान्यस्य दुःखमन्यो जानाति ॥

**प्रश्नाः -**

१० मर्दलः कदा कुत्र स्थापितः ?

२. तस्मिन् देशे के कुशलिनः !

३. उलूखलं कीदृशीं पीडामनुभवति ?

४. मर्दलस्य दुर्दशा कीदृशी !

५. पाठादस्मात् क उपदेशो गृह्यते युष्माभिः ?

**प्रगृह्यसन्धिः**

- कपी + इमौ = कपी इमौ ।
- गुरू + आगतौ = गुरू आगतौ ।
- फले + अभि = फले अभि ।
- अमी + अश्वाः = अमी अश्वाः ।

**'किम' शब्दस्य रूपैः वाक्यानि पूरयत-**

- युष्माकं पाठशालायां - विशेषः ?

- रणाय निर्गतस्य भटस्य - प्रवृत्तिः ?

## १८. गजः

मृगजातौ गजः गरिष्ठः । तस्य पादाः स्तम्भा इवस्थूलाः । तस्य कर्णौ शूर्पाविव विशालौ । तस्य नेत्रे तावदत्यल्पे । अथापि सोल्पान्यपि वस्तूनि द्रष्टुं शक्नोति । भूमौ स्थितां सूचिकामपि स पश्यति गृह्णाति च ॥

अत एव गजस्य शुण्डा 'हस्तः' इति 'करः' इति च व्यपदिश्यते । तेन गजस्य' हस्ती' 'करी' इति संज्ञे भवतः । शुण्डैव गजस्य नासिका । तयैव श्वसिति गजः । शुण्डाया अग्रे रन्ध्रमस्ति ।।

गजः प्रथमं शुण्डया जलमादाय पश्चात् तन्मुखे निषिञ्चति । एवं द्वाभ्यामवयवाभ्यां जलं पिबन् गजः ' द्विपः' इत्याख्यां भजते ।।

गजानां दृढौ तिक्ष्णौ च द्वौ दन्तौ स्तः । तस्मात् ते 'दन्तिनः', 'दन्ताचलाः 'द्विरदाः' इति कथ्यन्ते । शिल्पिनः करिणां दन्तैः रम्याणि महार्घाणि वस्तुनि निर्मान्ति । करेणूनां दन्तौ न स्तः ।।

यद्यपि गजा वन्या जन्तवः, तथापि ते जनैः कौशलेन गृह्यन्ते, शिक्ष्यन्ते च । साधु शिक्ष्यमाणास्ते जनैः कर्तुमशक्यानि कर्माणि कुर्वन्ति । गुरुतराणि दारूणि कर्षन्ति । शिक्षिता अपि गजास्तदा तदा मदेनोन्माद्यन्ति। तदा तान् आधोरणाः निशितेनाङ्कुशेन नियन्त्रयन्ति ।।

**बोधप्रश्नाः**

१. गजस्य पादाः कीदृशाः ?

२. कणा कीदृशौ ?

३. नेत्रे कीदृशे ?

४. नेत्रयोः शक्तिः कीदृशी ?

५. गजस्य शुण्डा हस्तः 'करः' इति व्यपदिश्यते, तत्र कारणं किम् ?

६. गजः 'करी' इति 'द्विपः' इति 'दन्ती' इति च कुतोऽभिधीयते ?

७. करिणां दन्तैः क उपयोगः ?

८. शिक्ष्यमाणा गजाः कानि कर्माणि कुर्वन्ति ?

९. आधोरणाः केन कदा गजान् नियन्त्रयन्ति?

**रत्वसन्धिः**

- अजगरवत् + लम्बते = अजगरवलम्बते
- भगवत् + लीला= भगवल्लीला
- सुहृद् + लाभः = सुह लामः

## १९. दश मूढाः

मूढानां चेष्टितानि प्रायेण विनोदावहानि । यथा हि- एकदा दशमूढाः देशाटनाय प्रस्थिताः । किञ्चित् दुरं गतानां तेषामुपस्थिता काचिदगाघा नदी। बाहुभ्यां तरन्तस्ते कथमपि नदीं तीर्त्वा पारं गताः ॥

आसीत् तेषां मध्ये कश्चन वृद्धः । 'स किं सर्वे तीरमनुप्राप्ताः ?' इति जिज्ञासमानस्तान् एकैकशो गणयामास । परं नवैव परिगणितास्तेन । ततः स आक्रोशत्- 'अहो ! वयं दश प्रस्थिताः । इदानीं नवैव स्मः। नूनमस्माकमेको नद्यां निमग्नः । गवेषयत तम्' इति । ततस्तेषामेकैकोऽपि गणनां चकार । परं नवैव दृश्यन्ते । ततस्तेषां व्याकुलीभूतानां महान् कोलाहलः समजनि ।

तत्रैव नातिदूरे कस्यचिदृषेः आश्रमोऽवर्तत । तत्र वसन् ऋषिः तेषां विचेष्टितमवलोक्य उच्चैर्जहास। तस्य हासशब्दं श्रुत्वा मूढास्तरसा समुपसृत्य हासकारणमपृच्छन् । ऋषिराह -'अहो ! अनात्मज्ञा यूयम् । युष्माकमेकैकोऽपि नात्मानमगणयत् तेनायं व्यामोहः सञ्जातः' इति ।

तदाकर्ण्य ते मूढाः सलज्जमधोमुखाः प्रययुः ।

**बोधप्रश्नाः**

१. दश मूढाः कुत्र प्रस्थिताः ?

२. कथं नदीमतरन् ?

३. तेषां व्याकुलीभावस्य को हेतुः ?

४. ऋषिः कुत उच्चैर्जहास ?

५. स तान् किमाह ?

६. मूढाः कथं ययुः ?

**जश्त्वसन्धिः**

- वाक् + रसः = वाग्रतः ।
- सम्राट् + भरति = सम्राड्भरति ।
- किञ्चित् + दूरम् = किञ्चिद्दूरम् ।
- अप् + धारा = अब्धारा ॥

## २०. कुक्कुटो रत्नं च

एकदा कुक्कुटः कश्चित् पादेनावकरं किरन् ।

ददर्श भासुरं किञ्चिद्रत्नं श्रेष्ठिगृहाङ्गणे ।।

कुक्कुटस्यानभिज्ञस्य रत्नलाभेन किं फलम्?

रत्नमूल्यं कियद्वेति किं स जानाति मन्दधीः । ।

अतः स पक्षौ विस्तृत्य विधूय वदनं मुहुः ।

तारं रटन् वक्रवक्त्रस्तद्रत्नं समगर्हयत् ।।

रे रत्नं ! शिरसा धृत्वा लोकस्त्वामभिनन्दतु ।

किन्तु धान्यकणेन त्वं नैव सादृश्यमर्हसि ॥

इत्युक्त्वा स च तद्रत्नं पादेनाक्षिप्य दूरतः ।।

अन्यत्र गतवान् शीघ्रं धान्यान्वेषणतत्परः ॥

**बोधप्रश्नाः**

१. कुक्कुटः कुत्र किं कुर्वन् कीदृशं रत्नं ददर्श ?

२. किं कृत्वा स तद्रत्नमगर्हयत् ?

३. कथमगर्हयत् ?

४. अनन्तरंस किं कृतवान् ?

**सन्धिं विश्लेषयत-**

- किञ्चिद्रत्नम् ।
- नैव ।
- पादेनाक्षिप्य ।
- तस्मा आम्रफलम् ।
- कियद्वेति ।
- सोऽवर्धत ।
- बुद्धिरपि ।
- इत्युक्त्वा ॥

## २१. मातापुत्रयोः संभाषणम्

कस्मिंश्चित् दिने सुगुणो नाम बालकः मात्रा सह गृहस्य बहिर्वेदिकायामास्त । तदा कश्चन याचकः समेत्य ' मातः ! भिक्षां देहि' इत्ययाचत ।।

तदा पुत्रो मातरं पृच्छति -

पुत्रः- अम्ब ! कोऽयम् ?

माता- वत्स ! अयं याचकः ।

पुत्रः- याचकः किं करोति ?

माता-स भिक्षां याचते । पाचनेन यल्लभ्यते तेनोदरं पूरयति ।

पुत्रः - किमित्ययं याचने नोदरं पूरयति ? कस्मान्न कर्म करोति ?

माता - वत्स ! अयमलमः ! आलस्येन बाल्ये पाठालयमगत्वा विद्याम् अनभ्यस्य कालमनयत् । न किञ्चिदपि कर्म परिशीलितं तेन ।

पुत्रः - विद्यया कथं जीविका निवर्त्यते ?

माता- विद्यया किं न सिध्यति ! विद्यया बुद्धिर्विकसति । बुद्धिमन्तो जनाः स्वाभीष्टं कर्म कर्तुं प्रभवन्ति । तेन सुखेन जीविकां निर्वर्तयन्ति । विद्वान् सर्वत्र पूज्यते ।

पुत्रः- अस्तु, अयं याचते खलु । किमनेन प्रतिदिनं भिक्षा लभ्येत ?

माता - कथं लभ्येत ! कदाचिल्लभ्यते, कदाचिन्न लभ्यते । यदा जनाः भिक्षां न वितरन्ति तदाऽयमञ्जलिं बद्धा पादयोः पतित्वा तान् याचति । यदि तदाऽपि न किञ्चिल्लभते तर्हि बुभुक्षया पीडितः कुत्रापि गत्वा चोरयति ।

पुत्रः - किं न चोरं राजपुरुषा बध्नन्ति?

माता - यदि राजपुरुषाः पश्यन्ति तर्हि तं बध्नन्ति, ताडयन्ति, कारां च प्रवेशयन्ति ।

पुत्रः- अम्ब ! अहमपि यदि न बाल्ये विद्यामभ्यस्ये तर्हि मयाऽपि याचितव्यं स्यात् । किं न ?

माता - जात- ! कः सन्देहः ? याचितव्यमेव भवेत् ।

पुत्रः - एवं चेत् अहं श्वः प्रभृति पाठालयं गमिष्यामि, विद्यां चाभ्यसिष्यामि ॥

माता - वत्स । आलस्यं विहाय विद्याभ्यासे यतस्व । उद्योगी भव । विद्यावन्तम् उद्योगिनं च नरं लक्ष्मीः स्वयमेवो- पैष्यति ।

तथा च सुभाषितरत्नाकरः - " उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः" इति ॥

**बोधप्रश्नाः-**

१. कदा कः 'भिक्षां देहि इत्ययाचत ?

२. कुतः स याचकः संवृत्तः ?

३. कथं विद्यया जीविका निर्वत्यते ?

४. कथं चोरो भवति कश्चित् ?

५. कदा याचितव्यं भवेत् ?

६. कं लक्ष्मीः स्वयमेवोपैष्यति ?

७. अस्मिन् पाठे कः उपदेशः गृह्यते ?

**अनुनासिकसन्धिः-**

बाक् + माधुर्यम् = वाङ्माधुर्यम् ।

परिव्राट् + नम्यते = परिव्राण्नम्यते ।

कस्मात् + नास्ति = कस्मान्नास्ति ।।

**विरुद्धपदानि –**

- कृत्वा X अकृत्वा
- गत्वा X अगत्वा
- अभ्यस्य × अनभ्यस्य
- विहाय X अविहाय

## २२. चोरो बालकः

कश्चित् बालकः पाठशालायां कस्यापि सहाध्यायिनः पुस्तकमचोरयत्। तत् स गृहमानीय मातुर्हस्तेऽर्पितवान्। तया स तदा तीव्रं दण्डनीय आसीत्। तदकृत्वा सा तस्य कृत्यमभिनन्ध तस्मा आम्रफलमैकं भक्षणार्थमयच्छत्।।

गच्छति काले यथा यथा सोऽवर्धत तथा तस्य स्तेयबुद्धिरपि वृद्धिं गता। किं बहुना ! कालेन स महांश्चोरः संवृत्तः।

एकदा स रात्रौ सन्धिच्छेदेन कस्यचिद्धनिकस्य गृहं प्राविशत्। गाढं निद्रिता अपि तद्गृहस्था जनाः सन्धिच्छेदशब्देन प्रबोधं गताः। तान् सर्वान् स व्यापाद्य महार्घाणि रत्नान्यादाय प्रतस्थे। पथि गच्छन् स रक्षापुरुषंगृहीतस्ताडितो दण्डाधिपस्य समीपं नीतश्च।।

दण्डाधिपः चोरस्य वृत्तान्तम् अवगत्य तस्य वधदण्डं व्यधात्। तदनु वध्यभूमिं नीयमानः स राजपुरुषानब्रवीत् -'भो भोः ! सकृन्मे मात्रा सह भाषणमनुमन्यध्वम्' - इति। ततस्तैः साक्रन्दं पृष्ठत आगच्छन्त्या मात्रा सह तस्य भाषणमन्वमन्यत।।

कुमारस्तस्या कर्णे रहस्यं कथयन्निव तामुपसृत्य तस्याः कर्णं ददंश। 'अहो ! मृत्युना गृहीतोऽपि पापोऽयं मात्रेद्रुश्चति' इत्युचैरुचुस्तत्र मिलिता जनाः। तदाकर्ण्य कुमारः- • भो जनाः ! नाहं पापः।

किन्त्वेषैव पुत्रघातिनी राक्षसी । आम्रफलदानेनैषा मम स्तेयासक्तिमवर्धयत' इत्युक्त्वा स पूर्ववृत्तान्तं तेभ्योऽकथयत् ।।

**बोधप्रश्नाः-**

१. कथं स बालश्चोरः संवृत्तः ?

२. स कुतो रक्षापुरुषैर्गृहीतः ?

३. दण्डाधिपः किम् अकरोत् ?

४. बध्यभूमिं नीयमानः स राजपुरुषान् किमब्रवीत् ?

५. माता कथम् अगच्छत् ?

६. तैः किमन्वमन्यत ?

७. कुमारः किं चकार ?

८. तत्र मिलिता जनाः किमूचुः?

९. तदाकर्ण्य स किमकथयत् ?

१०. पूर्ववृत्तान्तः कः ?

**रुत्वानुस्वारसन्धिः -**

- महान् + चोरः = महांश्चोरः ।
- कस्मिन् + चित् = कस्मिंश्चित् ।
- संशयान् + छिनत्ति = संशयां रिछनत्ति ।
- बाणान् + ताडयति = पात्रांस्ताडयति ॥

## त्रयोविंशः पाठः - मूर्खस्योपकारो न कर्तव्यः

कश्चन मूर्खः कदाचित् ग्रामान्तरात् प्रतिनिवर्तमानो निजग्रामगामिनं पन्थानं व्यस्मरत् । अथ पन्थानं पृच्छन्तं तं मूर्खं जनाः 'नदीतटे दृश्यमानस्य तरोरुपरि वर्त्मना गच्छ'- इत्यवोचन् ॥

ततः स तरुमुपगम्य 'एतस्योपरि खलु मे पन्थाः जनैरुपदिष्टः इति मत्वा तस्य तरोः पृष्ठमारोहत् । तस्य पृष्ठे सर्पतस्तस्य भारात् तरोः शाखा ननाम । स तां यत्नेनावलम्ब्य यावदतिष्ठत् तावत् कश्चिदाधोरणः गजोपरि स्थितः नद्या आरुह्य तेन पथा समाययौ ।।

तरुशाखावलम्बी मूर्खस्त हस्त्यारोहं दृष्ट्वा सदैन्यमवोचत् - महाभाग ! मां गृहाण' - इति । तदाकर्ण्य हस्त्यारोहः करुणया तं तरोरवतारयितुं पाणिभ्यां तस्यपादावग्रहीत् । मूर्खस्तु तरुशाखां नामुञ्चत्। अत्रान्तरे गजो निर्गतः । हत्त्यारोहः शाखाग्रलम्बिनस्तस्य पादयोर्ललम्बे ।।

ततः स मूर्खः सम्भ्रान्तो हस्त्यारोहमभ्यधात् - ' यदि जानासि तर्हि शीघ्रं किमपि गीतं पठ । गानं श्रुत्वा कोऽप्यागत्य आवामितोऽवतारयेत् ' - इति ।।

एवं तेनोक्तः स हस्त्यारोहस्तथा मधुरमगायत् यथा स मूर्खः प्रहृष्टः रसेन करतालिकां दातुं प्रावर्तत । अथ तत्क्षणं सहस्त्यारोहः मूर्खो नद्यां निपत्य विपेदे । पश्यत !उपकर्तुं प्रवृत्तस्य हस्त्यारोहस्य गतिम् ।

### बोधप्रश्नाः-

१. पन्थानं पृच्छन्तं मूर्खं के किमवोचन् ?

२. मूर्खः किमकरोत् ?

३. तदा किं संवृत्तम् ?

४. तेन पथा कः कथं समाययौ ?

५. हस्त्यारोहः किमर्थं मूर्खस्य पादावग्रहीत्!

६. हस्त्यारोहः किमर्थं मूर्खस्य पादयोः ललम्बे ?

७, कः किमर्थम् अगायत् ?

८. ततः किमभूत् ?

९. पाठादस्मात् क उपदेशो गृह्यते ?

१०. यावत् - तावत्, यदि तर्हि; अत्रान्तरे, तत्क्षणम् - एतानि उपयुज्य वाक्यानि रचयत

## २४. जरासन्धः

पुरा किल वृहद्रथो नाम मगधानां राजा बभूव । स काशिराजस्य द्वे अपि सुते पर्यणयत् । महताऽपि कालेन तस्य वंशकरः सुतो नाजायत । अतः स राट् भृशं दुःखितो राज्यं परित्यज्य भार्याभ्यां सह तपोवनमगच्छत् ।।

तत्र चण्डकौशिको नाम मुनिः सभार्यं तं तपसि निरतमपश्यत् । अपृच्छच्च तं तपसः कारणम् । पार्थिवश्चात्मनः सन्ततेरभावं कारणं व्यज्ञापयत् ।।

तन्निशम्य सत्यवाक् स महर्षिः आम्रफलमेकं तस्मै दत्त्वा जगाद - इदं फलं सन्ततिं दास्यति । निवर्तस्व । अलं क्लेशकारिणा तपसा' - इति । तदादाय प्रहृष्टो नृपः पत्नीभ्यां सहितः स्वपुरम् आजगाम । आगत्य च ताभ्यां तत्फलं प्रायच्छत् । ते उभे अपि तत् फलं द्विधा विभज्य तमभक्षयताम् । कालेनैका सजीवं शरीरार्धं प्रासूत, अपरा चापरमर्धम् । भीता धात्री ते अर्धे वनं नीत्वा कचिदुत्ससर्ज ।।

अथ जरा नाम राक्षसी पर्यटन्ती तं देशमाजगाम । अवलोक्य च ते शरीरार्धे कौतुकेन संयोजयामास । तदैकमूर्तिधरो वरः कुमारः समपद्यत । धार्मिकस्य महीक्षितः वंशे वसन्ती सा राक्षसी न तं कुमारं हन्तुमैच्छत् ।।

ततः सा कुमारमादाय राजानमुपगम्याब्रवीत् - 'राजन् ! अयं ते सुतः पत्नीद्वये जातः, गृह्यताम् ' - इति । भूयः सहर्षं तमादाय जरया सन्धितस्य तस्य जरासन्धः' इति नाम चकार ।।

**बोधप्रश्नाः-**

१. किं निमित्तं बृहद्रथो राजा भार्याभ्यां सह तपोवनमगच्छत् ?

२. तत्र कस्तमपश्यत् ?

३. सः राजानं किम् अपृच्छत् ?

४. राजा किं व्यज्ञापयत् ?

६. राजा किमकरोत् ?

७. के किमकुरुताम् ?

८. फलभक्षणेन किमभवत् ?

९. पुत्रस्य तथा नामकरणे को हेतु ?

**श्चुत्वसन्धिः**

- तस्मात् च = तस्माच्च
- जलात् जायते= जलाज्जायते ।
- अरीन् जयति= अरीञ्जयति ।

**सारांशः**

१.कथारूपेण संस्कृतभाषायाः अध्यापनेन सुखावबोधः जातः।

२. नीतिबोधकथया छात्राणां चित्तशुद्धिः जाता।

३. संस्कृतभाषायां कुशलता आगता।

४.व्याकरणपरिचयः प्राप्तः।

# खण्डः - ५

## पाठसंरचना

- प्रस्तावना
- उद्देशयम्
- प्रथमादर्शः-25तः आन्तम्
- बोधप्रश्नाः
- शब्दावली
- अभ्यासप्रश्नाः
- सन्दर्भग्रन्थाः
- सहायकग्रन्थाः

**प्रस्तावना-**

संस्कृतं पठितुं प्रविष्टानां नूतनानां छात्राणां भाषा प्रवेशाय उपयुक्तोऽयं ग्रन्थः- संस्कृतप्रथमादर्श इति। अस्मिन् ग्रन्थे गद्यपद्यद्वारा संस्कृतभाषाम् अवगन्तुं कश्चन सरलः पन्थाः अनुसृतो वर्तते। अस्य पठनेन संस्कृतभाषायां छात्राणां सरलेनोपायेन प्रवेशो भविष्यति।

**उद्देश्यम्-**

- बाल्यकथामाध्यमेन संस्कृतभाषायाः ज्ञानम्।
- धातुरूपाणां ज्ञानम्।
- शब्दरूपाणां ज्ञानम्।
- नूतनानां शब्दानां ज्ञानम्।

## २५. चन्द्रोदयः

पश्य ! पूर्वाद्रिशिखरे चन्द्रमाश्चारुमण्डलः।

भाति क्रीडाङ्गणे न्यस्तः सौवर्ण इव कन्दुकः॥ १

अथवा तमसा व्याप्तं जगद्दीपयितुं क्षमः।

सर्वानन्दकरो विद्युत्प्रदीप इव भात्ययम् ।।२

अथवा व्योमकासारे नक्षत्रकुमुदान्विते।

पयोदशैवलाकीर्णे भात्ययं राजहंसवत् ।।३

भासुरैस्तस्य किरणैः अभिव्याप्ता वसुन्धरा।

हैमद्रवविलिप्तेव भाति सर्वमनोहरा ॥४

भासयन् जगीं सर्वां घनध्वान्तं व्यपोहयन् ।

चन्द्रश्चन्द्र इवाभाति न तस्य सदृशः क्वचित् ।। 5

**बोधप्रश्नाः-**

१. चन्द्रमा कः क इव भाति ?

२. वसुन्धरा का इव माति ? केन हेतुना ?

३. कीदृशस्य तस्य न सदृशोऽस्ति ?

**ष्टुत्वसन्धिः**- (तवर्गस्य टवर्गेण योगे यथाक्रमं टवर्गः भवति)

उत् + टङ्कते उट्टङ्कते ।

चक्रिन् ढौकसे चक्रिण्ढौकसे ।

तद् + टीका = तट्टीका ।

षड् + नवतिः षण्णवतिः ॥

## १६. पितापुत्रयोः संभाषणम्

एकस्मिन् दिवसे गोपालो नाम बालकः पाठशालायां गोविन्दं नाम सहपाठिनं दुर्वचनैरनिन्दत् । तां प्रवृत्तिमुपाध्यायो गोपालस्य पित्रे सन्दिष्टवान् । पिता सायं पाठालयादागतं गोपालमाहूय, पृच्छति - पिता - वत्स ! अद्य पाठालये त्वया किमपि दुश्चेष्टितं कृतमिति श्रुतं मया । अपि तत् सत्यम्

पुत्रः - तात ! सत्यमेव तत् । प्रथमं गोविन्दो मामनिन्दत् । पश्चादहं तमनिन्दम् । स मां प्राहरत् । अहमुच्चैराक्रोशम् । सोऽप्याक्रोशत् ।

पिता - तदानीमुपाध्यायः किं नासीत् ?

पुत्रः आसीदुपाध्यायः । सोऽध्यापयन्नवर्तत । आवयोराक्रोशं श्रुत्वा स भृशं कुपितोऽभूत् ।

पिता-कुपितः किमकरोत् ?

पुत्रः- स सत्वरं पीठादुत्थाय आवयोः समीपम् आगतः ।

पिता- ततः किमकरोत् ? १

पुत्रः- ततः उपाध्यायः 'अरे! हस्तं प्रसारय' इति गोविन्दमवोचत् । गोविन्दो हस्तं प्रासारयत् । ततस्तं हस्ते वेत्रकाष्ठेनाताडयत् ।

पिता - मन्ये तद्वत् त्वयाऽपि दुश्चेष्टितस्य फलम् अनुभूतमिति । पुत्रः - तात ! मामप्युपाध्यायो ' हस्तं प्रसारय' इत्यवादीत् । नाहं प्रासारयम् ।

पिता - रे ! उपाध्यायस्य वचनं न कृतम् ! अस्तु । ततः किमभूत् ?

पुत्रः- ततो मामुपाध्यायः संरुष्टः 'पुस्तकानि गृहीत्वा त्वमितो याहि' इत्यवोचत् । अहं दण्डभयेन ततो निर्गत्य गृहमागतः ।

पिता - अरे दुष्ट ! दण्डभयेन ततो निर्गतस्त्वं द्विगुणं दण्डमहर्सि । (इत्युक्त्वा स वेत्रकाष्ठं हस्तेन गृहीतवान्)

पुत्रः-तात ! अयमेकोऽपराधः क्षम्यताम् । इतः परं नैवं करिष्यामि ।

पिता - वत्स ! तव सत्यवचनेन तुष्यामि । इतः परमीदृशे कर्मणि मा प्रवर्तस्व । आचार्यदेवो भव । सतां मतिमतां च बालकानां पन्थानमनुयाहि । ' अकृत्वा परसन्तापम् अगत्वा खलमन्दिरम् । अनुत्सृज्य सतां वर्त्म यत् स्वल्पमपि तद्बहु' ।। (सुभाषितरत्नाकरात् उद्धृतम्)

**बोधप्रश्नाः-**

१. कां प्रवृत्तिमुपाध्यायः गोपालस्य पित्रे सन्दिष्टवान् !

२. गोपालस्य पिता किमकरोत् ?

३. गोपालेन पाठालये कृतं दुश्चेष्टितं किम् ?

४. किमर्थं सः तथा अकरोत ?

५. उपाध्यायः किमिति गोपाले कुपितोऽभूत् !

६. स कुपितः किमकरोत् !

८. कथं पितुः कोपः शान्तः

७. पिता कुपितः किं व्यधात् ?

९. पिता पुत्रं किमुपदिष्टवान् !

**सन्धि विश्लेषयत -**

- सौवर्ण इव ।
- भात्ययम् ।
- चन्द्रश्चन्द्रः ।
- विलिप्तेव ।
- सहसैत्र ।
- एतस्योपरि ।
- तस्मा बाम्रफलम् ॥

## २७. महाकविः श्रीकालिदासः

पुरा भोजस्य राज्ञः सभायां परश्शता कवयोऽभूवन् । तेषामेकः कालिदासो नाम। कालिदासः प्रतिभया सर्वानन्यान् कवीनत्यशेत तेन भोजराजस्य तस्मिन् महानादरः । तमेव स कबीनां चक्रवर्तिनममन्यत ।।

इतरे कवयः तदसहमानाः परोक्षे भोज राजानमनिन्दन् । अयं वृत्तान्तः कथञ्चित् भोजस्य कर्णमागतः । एकस्मिन्नहनि राजा सर्वान् कवीनाहूय 'क-ख-ग-घ' इत्येतां 'समस्यां' दत्वा तानब्रवीत् यः समस्यामिमां पूरयिष्यति स एव कवीनां चक्रवर्ती भविष्यति' इति । एवमुक्त्वा तान् विससर्ज ।।॥

गृहमेत्य सर्वे कवयः सर्वान् व्यापारान् परित्यज्य समस्यायाः पूरणे निरता बभूवुः । परं नैकोऽपि समस्यां पूरयितुं शशाक । परेद्युस्ते राजसभामेत्य म्लानमुखाः तस्थुः ॥

कालिदासस्तु सभां प्रति चलन् मार्गे तालपत्रमयं पुस्तकमादाय पाठशालां गच्छन्तीं बालिकामपश्यत् । सा च तं दृष्ट्वा सविनयं प्रणनाम। तेन तस्यां प्रीतः कविः क्षणं तया सह सँल्लपति-

कालिदासः - का त्वं बाले ? बालिका - काञ्चनमाला । कालिदासः - कस्याः पुत्री ? बालिका - कनकलतायाः । कालिदासः- हस्ते किं ते ? बालिका-तालीपत्रम् । कालिदासः - का वा रेखा ! बालिका-क-ख-ग-घ ॥

तया सहैव सॅल्लप्य कालिदासः सभामगच्छत् । ततो राजा प्राह' भो भोः कवयः! पठ्यतां यदि पूरिता समस्या'। सर्वे निर्वचना अधोमुखाः स्थिताः । अथ कालिदासः पीठादुत्थाय व्यजिज्ञपत्- ' राजन् मया पूरिता समस्या । राजा प्राह - पठ्यताम् ' कालिदासः पठति -

का त्वं बाले? काञ्चनमाला कस्याः पुत्री ! कनकलतायाः । हस्ते किं ते ? तालीपत्रं का वा रेखा ? क-स-ग-घ ॥

श्लोकमिमं श्रुत्वा सर्वेऽपि कवयः त्यक्तमत्सराः कालिदासमेव कवीनां सार्वभौममन्वमन्यन्त ।।

**बोधप्रश्नाः-**

१. कालिदासो नाम कविः कुत्रासीत् ?

२. कः कुतस्तं कवीनां चक्रवर्तिनममन्यत ?

३. इतरे कवयः किम्कुर्वन् !

४. राजा कां समस्यां दत्वा तान् किमब्रवीत् ?

५. सर्वे कवयः किं चक्रुः ?

६. अपि ते समस्यामपूरयन् ?

७. कालिदासः कथं तामपूरयत् ?

८. कालिदासेन रचितः श्लोकः कः ?

९. श्लोक- मिमं श्रुत्वा सर्वेऽपि किमकुर्वन् !

**छत्वसन्धिः**

१. तत् + शिवः = तच्छिवः ।

२. तत् + श्लोकेन = तच्छ्लोकेन ।

३. तत् + श्रुत्वा = तच्छ्रुत्वा ।

४. अवदत् + शठः = अवदच्छठः ।

५. मृद् + शकटिकम् = मृच्छकटिकम् ॥

## २८. सीताविवाहः

पुरा मिथिलायां जनको नाम राजा बभूव । तस्य सुता सीता नाम । सा रूपे शीले चानुपमा बभूव । तां परिणेतुमिच्छन्तोऽनेके राजकुमाराः जनकाय दूतान् प्रेषयामासुः ।।

जनकस्तु तां वीर्यसम्पन्नाय क्षत्रियकुमाराय दातुमैच्छत् । अतः स तां वीर्येण क्रेतव्यामकल्पयत्। तथा हि तस्य सकाशे गुरुतरं किमपि धनुरासीत्। 'य इदं धनुरुद्धृत्य अस्मिन् शरं सन्धत्ते स मम सुतां परिणेष्यति' इति जनकः प्रतिजज्ञे।।

तां तस्य प्रतिज्ञां श्रुत्वा शतशो राजकुमाराः समाजग्मुः परं नैकोऽपि तेषां तद्धनुश्चलयितुमपि शशाक । ' लङ्काधिपती रावणोऽपि साटोपं समेत्य सलज्जं प्रतिनिवृत्तः इति ज्ञायते ।।

सर्वान् राजकुमारान् प्रतिनिवृत्तान् विलोक्य 'को मे दुहितुर्भर्ता भविष्यति !' इति चिन्तापरोऽभूज्जनकः । अत्रान्तरेऽयोध्याधिपतेः दशरथस्य पुत्रः श्रीरामः सलक्ष्मणो विश्वामित्रेण तत्रानीयत । श्रीरामो महर्षेः विश्वामित्रस्य वचनेन लीलयैव तद्धनुरुद्धृत्य यावत् तस्मिन् बाणमारोपयति तावत् तद्धनुर्द्वेधा भग्नमभूत् ।।

साधु साध्विति ब्रुवाणाः श्रीरामस्य वीर्यं प्रशशंसुर्जनाः ॥ जनकस्य राज्ञो हृदयं प्रहृष्टमभूत् । ततः स दशरथादीन् आनाय्य महता विभवेन सीतारामयोः विवाहोत्सवं निरवर्तयत् ।।

तथा च श्रीमद्वाल्मीकिरामायणे बालकाण्डे त्रिसप्ततितमः सर्गः -

'अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम् ।

इयं सीता मम सुता सहधर्मचरी तव ।।

प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।

पतिव्रता महाभागा छायेवानुगता तव ।।

**बोधप्रश्नाः-**

१. कां परिणेतुमिच्छन्तोऽनेके राजकुमाराः कस्मै दूतान् प्रेषयामासुः ?

२. जनकः किं प्रतिजज्ञे?

३. तस्य प्रतिज्ञां किंन्निमित्तं चिन्तापरोऽभूज्जनकः ! श्रुत्वा के समागताः?

४. अत्रान्तरे कस्तत्रः नीयत ?

५. धनुः कदा द्विधा भग्नमभूत्?

६.के कथं प्रशशंसुः ?

७. कस्य हृदयं प्रहृष्टमभूत् ?

८. ततो जनकः सीताविवाहं कथं निरवर्तयत् ?

**सन्धिः-**

अधिपतिः + रावणः = अधिपती रावणः ।

यतिः + राजते = यती राजते ।

पुनः + रमते = पुना रमते ।

गुरुः + रेजे = गुरू रेजे ।

## २९. विरक्तः महर्षिः

अहो ! रम्यः शान्तश्च अयमाश्रमः । आश्रमस्य पार्श्वे प्रसन्ना नदी प्रवहति। आश्रमं परितस्तरवो लताश्च पुष्पितास्तिष्ठन्ति । अयं महर्षिः इदानीमीश्वरं ध्यायति ॥

अस्य निकटे विद्यामभ्यस्यन्ति बहवः छात्राः अयमतीव विरक्तो महर्षिः। नास्य धने स्पृहा वर्तते । महार्घाणि रत्नान्यप्ययं लोष्टवत् पश्यति । अतः शिष्यैः स्वयं भक्त्या दीयमानामपि गुरुदक्षिणां नायं प्रतीच्छति ।।

एकदा कश्चित् राजकुमारोऽस्मात् विद्यामध्यैत । समाप्तविद्यः स गुरुं गुरुदक्षिणया तोषयितुमिच्छन् महता धनव्ययेन रत्नालङ्कृतं हैमं कङ्कणद्वयं कारयित्वा ऋषेः समीपमाजगाम ।।

ऋषिः सायं नद्यास्तीरे शिलायामासीनः प्रकृतेश्चारुतां पश्यन्नवर्तत । राजकुमारस्तमुपसृत्य कङ्कणद्वयं तस्मै समर्प्य प्राञ्जलिस्तस्थौ । ऋषिस्तयोः कङ्कणयोश्चारुतानवेक्षमाण इव ते निरूपयामास । अथ तयोरेकं स्वयमेव हस्तात् परिभ्रष्टमिति व्याजेन नद्यां पातयामास । अत्रान्तरे राजकुमारः प्रकृतेश्चारुतां पश्यन्नासीत् । विदितवृत्तान्तस्य राजकुमारस्य प्राणाः उत्क्रान्ता इवाभवन् ।।

अथ राजकुमारः 'स्वयमेव नद्यां निपत्य तत् ग्रहीष्यामि' इति मत्वा ऋषिमपृच्छत् भगवन् ! कुत्र तत् पतितम् ?' इति । ऋषिरपि व्याकुल इव भूत्वा 'अत्र तत् पतितम्' इति दर्शयन् द्वितीयमपि कङ्कणं नद्यां प्राक्षिपत् । राजकुमारः परिदूनो लज्जितश्च प्रत्यगात् ।।

**बोधप्रश्नाः-**

१. कीदृशोऽयमाश्रमः ?

२. अयं महर्षिरिदानीं किं करोति ?

३. कुतो नायं गुरुदक्षिणां प्रत्तीच्छति ?

४. शिष्यः राजकुमारः किमकरोत् ?

५. ऋषिः किं चकार ?

६. कुतो राजकुमारस्य प्राणा उत्क्रान्ता इवाभवन् ?

७. ऋषिः किमपृच्छत् ?

८. ऋषिः किमकरोत् ?

❖ **सन्धिः-**

महा ऋषिः = महर्षिः ।

वसन्त ऋतुः = वसन्तर्तुः ।

## ३०. चित्रश्लोकाः

कस्तूरी जायते कस्मात् ?  को हन्ति करिणां कुलम्?

किं कुर्यात् कातरो युद्धे? मृगात् सिंहः पलायते ।।१

अस्ति कुक्षिः शिरो नास्ति  बाहुरस्ति निरङ्गुलिः ।

अपदो नरभक्षी च  यो जानाति स पण्डितः ।।२

अपदो दूरगामी च साक्षरो न च पण्डितः ।

अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ।।३

सीमन्तिनीषु का शान्ता ? राजा कोऽभूद्गुणोत्तमः ?

विद्वद्भिः का सदा वन्द्या ? तत्रैवोक्तं न बुध्यते ।।४

कुलालस्य गृहेऽस्त्यर्धं तदर्धं हस्तिनापुरे ।

लङ्कायामपि तद्युग्मं यो जानाति स कोविदः ।।५

अम्लानपङ्कजा माला कण्ठे रामस्य सीतया ।

मुधा बुधा भ्रमन्त्यत्र प्रत्यक्षेपि क्रियापदे ।।६

विराटनगरे रम्ये कीचकादुपकीचकम् ।

अत्र क्रियापदं वक्रे हैमं दास्यामि कङ्कणम् ।।७

**बोधप्रश्नाः-**

1. कस्तूरी कस्मात् जायते?
2. किं कुर्यात् कोतरो युद्धे?
3. करिणां कुलं को हन्ति?
4. अपदो दूरगामी कः?
5. लङ्कायां युग्मं कः?

सन्धि विश्लेषयत -

पश्यन्नवर्तत ।

लीलयेव ।

बाहुरास्त ।

तत्रैवोक्तम् ।।

## ३१. काकोलूकीयम्

एकदा पक्षिणः सम्भूय मन्त्रयामासुः अस्माकं राजा वैनतेयः । स च वासुदेवस्य सेवायां तत्परो नास्माकं कामपि चिन्तां करोति । किं तेन राज्ञा नः प्रयोजनम् ! अतोऽन्यं कमपि राज्येऽभिषिञ्चामः' इति । एवं निश्चित्य तैः भद्राकारम् उलूकम् अवलोक्याभिहितम् -' एष उलुकः अस्माकं राजा भविष्यति । सम्पाद्यन्तां पट्टाभिषेकसम्बन्धिनः सम्भाराः' इति ।।

अथ समानीतानि विविधतीर्थोदकानि। प्रदत्तं सिंहासनम्। प्रसारितं व्याघ्रचर्म । प्रज्वलिता दीपाः । आरब्धानि वाद्यानि । युवतयो गानम् आरभन्त ! आनीता
पट्टमहिषी कृकालिका । उलूकोऽभिषेकार्थं सिंहासनमारोपितः । जरगवोऽभिषेकार्थं हेमकुम्भं हस्तेन धृतवान् ।।

अत्रान्तरे वायसः कश्चित् तत्र समायातः । अपृच्छच्च - अहो ! किमेष सकलानां पक्षिणां समागमो महोत्सवश्च ? इति यथास्थितं निवेदयामासुः पक्षिणः।।

अथ काको विहस्याह- अहो ! न युक्तम् एतत् ! किमिति हंसादिषु पक्षिषु विद्यमानेषु दिवान्धस्य क्रियतेऽभिषेकः? श्रोतव्यं सर्वैः-

**"वक्रनासं सुजिह्माक्षं क्रूरमप्रियदर्शनम्।**

**उलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति ।। "**

तस्योपदेशं श्रुत्वा- 'साध्वनेनाभिहितम्। पार्थि-वार्थमधिकृत्य भूयः समेत्य मन्त्रयिष्यामहे' इति ब्रुवाणाः सर्वे पक्षिणः यथाभिमतं गताः । दिवान्धः केवलं सिंहासनोपविष्टः कृकालिकया सहास्ते । आह च 'कः कोऽत्र भोः? किमद्यापि न क्रियतेऽभिषेकः' इति ।।

ततः कृकालिकयाऽभिहितम् तवाभिषेके कृतोऽयं विघ्नो वायसेन। गताः सर्वे पक्षिणः। तत् त्वमुत्तिष्ठ। स्वाश्रय त्वां प्रापयामि' इति । ततः स दिवान्धः कृकालिकया दर्शमानमार्गः सविषादं स्वाश्रयं जगाम । ततः प्रभृति काकानाम् उलूकानां च शाश्वतिकः विरोधः अभवत् ।।

**बोधप्रश्नाः-**

१. एकदा पक्षिणः सम्भूय किं मन्त्रयामासुः ?

२. उलुकमवलोक्य तैः किमभिहितम् ?

३. अथ किं वृत्तम् ?

४. केन कथं पट्टाभिषेकस्य विघ्नः कृतः ?

५. पक्षिणः किम् अभिहितवन्तः कृतवन्तश्च ?

६. दिवान्धः किं चकार ?

७. उलूकः कथं स्वाश्रयं गतः?

८. काकानाम् उलुकानां च विरोधः कथं अभवत् ?

**सन्धिः** -

१. दिक् + हसति = दिग्घसति ।

२. उत् + हृत्य = उद्धृत्य ।

३. वाक् + हरति = वाग्घरति ।

४. अवदत् + हरिः अवदद्धरिः ॥

५. सत् + हेतुः = सद्धेतुः ।

६. रामात् + हि= रामाद्धि ।

७. तत् + हितम् = तद्धितम् ।

८. कश्चित् + हयः = कश्चिद्धयः ॥

## ३२. फलानि

चित्रेऽस्मिन् आम्रं पनसं कदलीफलं सीताफलं द्राक्षा मातुलुङ्गम् इत्यादीनि विविधानि फलानि सन्ति । उपरिष्टात् प्रथमायां पङ्क्तौ वामतस्त्रीण्याम्रफलानि विद्यन्ते । तान्येकस्मिन् वृन्ते श्लिष्टानि वर्तन्ते । अपक्वानि च तानि । पक्वान्याम्रफलानि रुचिराणि भवन्ति, वर्णश्च तेषां रम्यः ।।

आम्राणां दक्षिणतो विद्यमानं पनसफलम् । बहिः कण्टकैरावृतं वर्तते पनसफलम् । तस्य गन्धस्तु मनोहरः । परम् अधिकतया भक्ष्यमाणं तदुदरपीडां जनयति ।।

द्वितीयस्यां पङ्क्तौ वामतः कदलीफलानि विद्यन्ते । पक्वानां कदलीफलानां वर्णः पीतः अपक्वानां तु हरितः । कानिचित् कदलीफलानि रुचिराणि हितावहानि च भवन्ति । कदलीनां दक्षिणतः सीताफलं वर्तते, तस्यापि दक्षिणतो द्राक्षागुच्छः ।।

तृतीयस्यां श्रेणौ वामभागे विद्यमानानि मातुलुङ्गफलानि। इतरेषां केषाञ्चित् फलानां नामान्यप्रसिद्धानि । तेषु कानिचित् विदेशीयानि फलानि ।।

फलानामाहारः सात्विकः पथ्यश्च । अत एव मुनयः प्रायेण फलैरेव जीविकां वर्तयन्ति। तेन ते नीरोगाश्चिरायुषश्च भवन्ति ।।

**बोधप्रश्नाः-**

१. चित्रेऽस्मिन् कीदृशानि फलानि सन्ति ?

२. तेषां गुणाविशेषाः के?

३. उदरपीडां कदा किं जनयति ?

४. कुतो मुनयः फलैर्जीविकां वर्तयन्ति ?

५. तेन ते कीदृशा भवन्ति ?

## ३३. लक्ष्मणस्य प्रस्थानम्

पितुराज्ञया मुदित एव वनं प्रस्थितः सीतया सहितो रामः। लक्ष्मणस्तु बलवददह्यत शोकेन। क्षणं स उन्मत्त इव कर्तव्यं नाज्ञासीत्। न खलु रामं विना क्षणमप्यवस्थितं लक्ष्मणेन। अतः स कथं सहतां श्रीरामस्य विरहम्! ।।

अथ स धीरः कुमारश्चिरं विचिन्त्य गत्यन्तरमपश्यन् स्वयं रामस्यानुगमने मतिं व्यधत्त। ततः स मातरं सुमित्रामाप्रष्टुं तदन्तिकं जगाम। रामस्य विरहमनु- चिन्त्य मृतेव भूमौ पतिता सा लक्ष्मणस्यागमनं नाभ्यनन्दत्। लक्ष्मणस्तु तां सम्बोध्य मृदुना स्वरेणात्मनश्छन्दं न्यवेदयत्।।

तेन वचनेन प्रत्युज्जीवितेव सा झटित्युत्थाय कुमारं गाढमालिलिङ्ग। जगाद च सगद्गदम्- 'जात ! अद्याहं पुत्रिणी जाता । अद्याहं वीरमाताऽस्मि । अद्य मे शोकस्त्वया शान्तिं गमितः। सर्वथैव रामभद्रमनुयाहि' - इति ।।

अथ मुदितः कुमारो मातरं प्रणनाम। सा तं मूर्ध्न्युपाघ्राय कथयति-

**"गम्यतामर्थलाभाय क्षेमाय विजयाय च।**
**शत्रुपक्षविनाशाय पुनः सन्दर्शनाय च ॥**

**रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।**

**अयोध्यामटवीं बिद्धि गच्छ तात यथासुखम् ।।"** - इति ।। .(श्रीमद्वाल्मीकिरामायणे

अयोध्याकाण्डे चत्वारिंशः (४०) सर्गः ।।

अथ लक्ष्मणो देवतायाः प्रसादमिव मातुरुपदेशं मानयन् धनुर्बाणपाणिः श्रीराममन्वगच्छत् ।।

**बोधप्रश्नाः-**

१. लक्ष्मणः कुतो न सहते रामस्य विरहम् ?

२. सुधीरः कुमारः चिरं विचिन्त्य किमकार्षीत् ?

३. तस्य माता कुतो न तस्यागमनमभ्यनन्दत् ?

४. केन प्रत्युज्जीवितेव जाता सा ?

५. किं जगाद सगद्गदम् ?

६. सा तं मूर्ध्न्युपाघ्राय किं कथयति ?

७. लक्ष्मणः किमकरोत् ?

**सन्धिं विश्लेषयत** –

१. फलैरेव

२. हरी

३. राजते

४. वर्णश्च

५. कोऽत्र

६. सर्वधैव॥

## ३४. भूमिः

भूमिः कन्दुकवत् गोलाकृतिः। तस्यास्त्रिषु भागेषु द्वौ भागौ जलम् । त्रिष्वेको भागः स्थलम्। चित्रं पश्य, तत्र शुक्लो भागः स्थलम्। कृष्णो भागः जलम् ।स्थलभागः एसिया, यूरोप, आफ्रिका, अमेरिका, आस्ट्रेलिया चेति पञ्चखण्डत्वेन विभक्तः।

जलभागः- शान्तसागरः, अतलान्तिकसागरः, भारतसागरः, उत्तरध्रुवसागरः, दक्षिणध्रुवसागरश्चेति पश्चसागरत्वेन विभक्तः । समुद्रेषु तत्र तत्र सिंहलादयो द्वीपाः सन्ति ।।

एसियाखण्डः सर्वेषु खण्डेषु विशालतमः । खण्डेऽस्मिन् विद्यया परिष्कारेण च खण्डान्तराण्यतिशयनाऽस्माकं भारतभूमिर्विराजते । अस्यां परमपावनाः गङ्गा-सिन्धु-गोदावरी- नर्मदा-कावेरीप्रभृतयो नद्यः, परमोन्नता हिमालयप्रभृतयः पर्वताश्च विलसन्ति । अत एव भारतभूमिः अतीव प्रशस्ता ।।

यूरोपूखण्डोऽनेकैः सार्वभौमैर्विभज्य भुज्यते। तस्मिन् निवसन्तो जनाः श्वेतगात्राः ॥

अमेरिकाखण्डो दक्षिणामेरिका उत्तरामेरिका चेति द्वेधा विभक्तः । खण्डोऽयमतीव विशालः समृद्धश्च । गोधूमादीनि धान्यानि प्रभूततया तत्र प्ररोहन्ति ।।

आफ्रिकाखण्डो विशाल एव । किन्तु अत्र भूयान् भागो मरुभूमिः । नद्योऽत्र विरलाः ।

सहाराख्योऽतिविशालः कश्चिन्मरुप्रदेशोऽत्र सुप्रसिद्धः ।।

आस्त्रेलियाखण्डः सर्वेषु खण्डेष्वल्पिष्ठः । खनिजानि द्रव्याण्यत्र बाहुल्येन समासाद्यन्ते । ऊर्णाव्यवसायोऽस्मिन् खण्डे प्रसिद्धः ।।

शान्तसागरोऽन्वर्थनामा विराजते । अतीव विशालोऽप्ययमत्यन्तं शान्तः । अस्मिन्नावर्ताः कल्लोलाश्च न सन्ति ।

अतलान्तिकाब्धिरल्पीयानप्यतीव भयङ्करः । भारतसागरोऽस्माकं भारतवर्षस्य दक्षिणतो वर्तते ।।

उत्तरध्रुवसागरस्य जलमतीव शीतलम्। तत्रत्येषु द्वीपेषु जनानां वासो दुष्करः । समुद्रेऽस्मिन् शैलतुल्या हिमखण्डाः प्लवन्ते । ते वात्यया नीयमानाः शश्वत् प्रवहणानि निहत्य जले मज्जयन्ति । दक्षिणध्रूवसागरस्थ जलं शैत्येन घनीभूतं शिलाप्रायं वर्तते। न तस्मिन् द्वीपाः सन्ति, नापि तत्र प्रवहणानि सञ्चरन्ति ।।

आकाशे परिभ्रमतां गोलानां मध्ये भूमिरन्यतमा । भूगोलापेक्षयाप्युत्तराणि गोलान्तराण्याकाशे विद्यन्ते । सूर्य- चन्द्रौ सर्वाणि नक्षत्राणि च भूगोलवत् गोलानि इति तत्रापि जीवराशयो निवसन्ति इति च गोलशास्त्राभिज्ञाः कथयन्ति ।।

**बोधप्रश्नाः**

१. भूमिः कीदृशी ?

२. तस्याः कियान् भागो जलम् ?

३. कियान् भागः स्थलम् ?

४. पञ्च खण्डाः के ?

५. पश्च सागराः के ?

६. उत्तरध्रुवसागरः दक्षिणध्रुवसागरश्च कीदृशौ ?

७. भारतभूमेः प्राशस्त्यं कथम् ?

८. सा कस्मिन् खण्डे अन्तर्भवति !

९. आकाशे विद्यमानानि गोलान्तराणि कानि ?

१०. गोलशास्त्रा- भिज्ञाः किं कथयन्ति ?

## ३५. नीतिमाला - प्रथमो भागः ॥

लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः ।

बन्धनं चैत्र जिह्वाग्रे जिह्वाग्रे मरणं ध्रुवम् ।।1

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ।।2

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।

श्रोत्रस्य भूपणं शास्त्रं भूषणैः किं प्रयोजनम् ।।3

दिवा पश्यति नोलूकः काको नक्तं न पश्यति ।

विद्याविहीनो मूढस्तु दिवा नक्तं न पश्यति ।।4

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।

पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥5

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।

विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥6

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।

स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥7

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।

परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ।।8

**बोधप्रश्नाः-**

१. जिह्वाग्रे कानि वसन्ति ?

२. कुतः प्रियं वाक्यं वक्तव्यम् !

३. हस्तादीनां भूषणानि कानि ?

४. उलुकः काकः मूढश्च कदा न पश्यन्ति ?

५. कथं विद्या सुखस्य कारणम् ?

६. विद्याहीनाः क इव न शोभन्ते ?

७. विद्वत्वं च नृपत्वं च कुतो न तुल्ये ?

८. विद्या, मतिः, धर्मः, शीलं च कुत्र कुत्र धनं भवन्ति ?

**सन्धत्त** –

- लक्ष्मीः + वसति
- न + उलूकः
- निर्गन्धाः + इव
- न + एव
- मूढः + तु
- हिताः + न ॥

## ३५. नीतिमाला- द्वितीयो भागः

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।

त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ।। 1

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।

वास्यते तद्वनं सर्वं सुपुत्रेण कुलं यथा ।। 2

एकेनापि कुवृक्षेण कोटरस्थितवह्निना ।

दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ।। 3

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।

को विदेशः सविद्यानां कः परः प्रियवादिनाम् ।।4

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।

अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान् ।।5

न संशयमनारुह्य नरो भद्राणि पश्यति ।

संशयं पुनरारुह्य यदि जीवति पश्यति ।।6

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।

गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ।। 7

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।

अतृणे पतितो बह्निः स्वयमेवोपशाम्यति ।।8

**बोधप्रश्ना: -**

1 . चन्द्रः, रविः, धर्मः, सुपुत्रश्च कीदृशाः ?

2. सुपुत्रेण तुल्यः कः ?

3. वनं केन दह्यते?

4. समर्थादीनां किं किं नास्ति?

5. कुतः श्वः कार्यमद्य कुर्वीत?

6. कदा नरः भद्राणि न पश्यति ? कदा पश्यति ?

7. नरस्य, रूपस्य, गुणस्य, ज्ञानस्य चाभरणं किम्?

8. क्षमाशस्त्रेण को गुणः सिध्यति? अत्र दृष्टान्तः कः?

**सन्धिः**

रक्तेन +अपि

तत्+ बनम्,

यतिः+ राजते

## ३५. नीतिमाला - तृतीयः भागः

अविचार्य न वक्तव्यं वक्तव्यं सुविचारितम् !

किञ्च तत्रैव वक्तव्यं यत्रोक्तं सफलं भवेत् ।।1

मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत्।

अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ।।2

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत्।

न जले शकटं याति न नौर्गच्छति स्थले।।3

चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।

न युक्तं कूपखननं सन्दिप्तो वह्निना गृहे।।4

परोऽपि  हितवान् बन्धुः बन्धुरप्यहितः परः ।

अहितो देहजो व्याधिः हितमारण्यमौषधम् ।।5

मातृवत् परदारांच परद्रव्याणि लोष्टवत्।

आत्मवत् सर्वभ्रुतानि यः पश्यति स पश्यति ॥6

छायामन्यस्य कुर्वन्ति निष्ठन्ति स्वयमातपे।

फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ।।7

गुणवज्जनसंसर्गात् याति स्वल्पोऽपि गौरवम्।

पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते।।8

महाजनस्य संसर्गः कस्य नोन्नतिकारकः।

पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम्।।9

**बोधप्रश्नाः-**

1. कीदृशं वचः कुत्र वक्तव्यम् कथं न वक्तव्यम् ?
2. मनसा चिन्तितं कार्यं बचसा कुतो न प्रकाशयेत्
3. शक्यमशक्यं च कार्यमुदाहरत।
4. विपदां प्रतिक्रिया कदा चिन्तनीया ?
5. कूपखननं कदा न युक्तम् ?
6. परोऽपि को बन्धुः ! बन्धुरपि कः परः ?
7. अत्र दृष्टान्तौ कौ ?
8. 'स पश्यति कः ?
9. 'वृक्षा सत्पुरुषा इव' कथम्?
10. स्वल्पः कथं गौरवं याति ? दृष्टान्तः कः ?
11. महतां संसर्गः किं सम्पादयति ? दृष्टान्तं वद ॥

**शब्दावली-**

संसर्गः, तमसा, करिणाम्, कस्तूरी, पाठालयः, सत्यवचनम्, वृतान्तः, स्वल्पः, गुरुतरम्, जनकः, विश्वामित्रः, ऋषिः, सत्पुरुषः, राजकुमारः, अपादः, दृष्टान्तः, पण्डितः याति, माला, काकः, वायसः,सीतीफलम्, लक्ष्मणः, कुमारः, दशरथः, स्थलम्, हिमालयः, पर्वतः, आकाशः, हस्त, विद्या, विद्वान् ,शीलम्, सर्वत्र, भद्रम्, क्षमा, करः, वह्निः, बन्धुश्च वृक्षाः, महाजनः, वारि इत्यादयाः।

**अभ्यासप्रश्नाः**

1. चन्द्रोदय पाठस्य साराशं लिखत।
2. पितापुत्रसम्भाषणम् स्वभाषया लिखत।
3. महाकविः श्रीकालिदासः इति पाठस्य सारांशं लिखत।
4. सीताविवाहः पोठं यथाग्रन्थं लिखत।
5. विरक्तमहर्षिवृतान्तं यथाग्रन्थं विशदयत।
6. लक्ष्मणस्य प्रस्थानं इति पाठमवलम्ब्य सारांशं लिखत।
7. भूमिः इति पाठस्य सारांशं लिखत।

**सन्दर्भग्रन्थसूची-**

2. संस्कृतप्रथमादर्शः- आर. एस. वाद्यार एन्ड सन्स, पालकाड भारत, 2014

**सहायकग्रन्थसूची-**

2. शब्दमञ्जरी- आर. एस. वाद्यार एन्ड सन्स, पालकाड भारत, 2014

***************